
उपाकर्म - पद्धतिः



खेमराज श्रीकृष्णदास प्रकाशन, बम्बई

ॐ नमः शिवाय

चातुर्थीलाली

उपाकर्म - पद्धतिः

(सटिप्पणिका)

★

गौड़पण्डित श्रीगङ्गाधर शर्मणा सङ्कलिता

मुद्रक एवं प्रकाशक :
खेमराज श्रीकृष्णदास,
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग, बम्बई–४०० ००

संस्करण : जनवरी २०२०, संवत् २०७६

मूल्य : १२० रुपये मात्र ।


मुद्रक एवं प्रकाशक:
खेमराज श्रीकृष्णदास,™
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
मुंबई - ४०० ००४.

Printers & Publishers :
Khemraj Shrikrishnadass,
Prop: Shri Venkateshwar Press,
Khemraj Shrikrishnadass Marg, 7th Khetwadi,
Mumbai - 400 004.

Web Site : http://www.Khe-shri.com
Email : khemraj@vsnl.com

Printed by Sanjay Bajaj For M/s. Khemraj Shrikrishnadass Proprietors Shri Venkateshwar Press, Mumbai - 400 004, at their Shri Venkateshwar Press, 66 Hadapsar Industrial Estate, Pune 411 013.

" कर्मठाचार्य स्व० पंडित श्रीचतुर्थीलालजी गौड द्वादशमहानिबन्धकर्ता " रतनगढ (राजस्थान)



(ग्रन्थकर्ता के पिता एवं ज्येष्ठ भ्राता)

जन्म-आश्विन कृष्णा ४ सं० १९२४] [मृत्यु-कार्तिक कृष्णा ६ सं० १९८१

समर्पणम्–

★

" श्रीरतनगढ़वास्तव्यानां, गौड़कुल कमलदिवाकराणां भिषजामग्रणीनां, स्वनामधन्यानां, संस्कृत भाषणानुरागिणां, भावुकानां, सहृदयहृदयाह्लादकानां, प्रातः स्मरणीयानां, परमपूज्यानां, मदीय ज्येष्ठ सहोदराणां, श्रीमतां स्वर्गीय पण्डित श्रीमहादेव प्रसाद शास्त्रिणां करकमलयोः पुण्यस्मृतौ सादरं समर्पितेयं पद्धतिः–

भवदीयाऽनुजेन–

श्रीगङ्गाधर शर्मणा तामड़ायतेन । "

ग्रन्थकर्त्ता-



गौड़ पण्डित श्रीगङ्गाधर शर्मा

तामड़ायत

जन्मस्थानः-
रतनगढ़
(राजस्थान)

जन्मतिथिः-
श्रावण शुक्ला १५.
सं० १९७१

प्राक्कथनम्-

★

"अद्यत्वे करालस्य कलेः प्रभावतो भारतवर्षीयार्य सन्तत योऽपि, दुर्दान्तान्तर्निष्ठालस्यस्य शत्रोर्वशं गताः स्व स्व कर्मविमुखा भवन्तीति हन्त खिद्यते चेतः। एतश्च सर्व एव विदंति 'यदुपाकर्म' द्विजातिमात्रस्य मुख्यं कर्मेति। अतोऽस्मिन् दिने निखिलं कर्म विहाय प्रातः स्नान सन्ध्यादि नित्यावश्यकं कर्म समाप्य स्वेष्ट मित्रवान्धवैः सह नद्यादि जलाशये ग्रामाद् वहिर्गत्वा शास्त्रोक्त विधिना श्रावणीकर्म कुर्वीत।

अदः श्रावणीकर्म तथा रक्षाबन्धनं च श्रावणशुक्ल पूर्णिमायां भवति। यदि श्रावणशुक्लायाः पूर्णिमायां ग्रहणं संक्रान्तिर्वा भवेत्तदा यजुर्वेदिभिः श्रावणशुक्लपञ्चम्यामुपाकर्म कर्तव्यं। **तदुक्तं स्मृतिमहार्णवे**-"संक्रान्तिर्ग्रहणं वापि पौर्णिमास्यां यदा भवेत्। उपाकृतिस्तु पञ्चम्यां कार्या-वाजसनेयिभिः॥" **इति**।

भद्रायां च रक्षाबन्धनं न विधेयं, परं चोपाकर्मणि भद्राया दोषोऽपि न भणितः।

उक्तं च विश्वनाथेन-"भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा। श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी॥" इति वचनादत्र श्रावणीति शब्देन रक्षाबन्धनमेव गृह्यते, नोपाकर्म तस्य पृथगुपादानादिति विदुषां परामर्श इति ध्येयम्। पुण्येऽस्मिन् दिवसे सर्व एव द्विजाः प्रायः कर्मेदं कुर्वन्ति, तथाऽपि तत्कर्मबोधिका काचन सरल पद्धतिर्नास्ति यतः कर्मठानां कृते सौकर्यं स्यादित्येतद् विचार्यैव मया पूज्यपादपितृचरणानां स्मृतौ "**श्रीरतनगढ़निवासि कर्मठाचार्य स्वर्गीय पण्डित श्रीचतुर्थीलाल गौड़ स्मृतिग्रन्थमालाया**" निर्माणं कृतम्।

यस्या इदं पुष्पं भगवतः श्रीशंकरस्य परमानुग्रहेण विद्वज्जन सेवायां सादरं निवेद्यते । यद्यपि मदीय पूज्य पितृचरणैर्निर्मितया "**नित्यकर्म प्रयोग मालया**" उपाकर्म कर्म प्रायो भूदेवाः कुर्वन्ति कारयन्ति च, तथापि इदं स्वतन्त्रमेव "**चातुर्थीलाली उपाकर्म पद्धतिः**" नामकं पुस्तकं स्वपितृस्मृतौ निर्मितं । एतादृशं पुस्तकमद्यावधि न मुद्रितं न प्रकाशितं केनापि । पद्धतिरियमनेकविधैर्नवीनावश्यकैर्विषयैः सह स्थाने स्थाने विस्तृत टिप्पण्यादिभिश्च समलङ्कृत्य सुन्दर विधया समुल्लिख्य प्रकाशिता ।

एतद् ग्रन्थस्य वैशिष्ट्यं च साधारण संस्कृतज्ञोऽपि कर्मकाण्डजीवी पण्डितः केवलेनानेनापि पुस्तकेनैव साङ्गोपाङ्गमुपाकर्म सम्पादयितुं क्षम इति मे दृढो निश्चयः । यद्यप्याधुनिके काले "**श्रावणी प्रयोगः, उपाकर्म पद्धतिः**" इत्यादि नामभिर्नानापुस्तकानि प्रसृतानि प्रचलितानि च विलोक्यन्ते, तथापि साङ्गोपाङ्गरूपेण तेषामभावं विलोक्य पुस्तकान्तरं गृहीत्वैव कर्म कारयमाणाः पण्डिता दृष्टा अतस्तां त्रुटिं निरस्य साङ्गोपाङ्गेयं पद्धतिरभिनवैव मया भूदेवानां सुखाय कृता । आशासे सर्वेऽपि भूदेवा अनया कर्मकारयित्वा मच्छ्रमं सफलयिष्यन्तीति ।

यदिदं नवीनं संस्करणं सकल सहृदय पाठकानामुपयोगि रुचिकरञ्च सेत्स्यति तदाहं स्वपरिश्रमं सफलं ज्ञास्यामि । "**चातुर्थीलाली वास्तु शान्ति पद्धतिः शतचण्डी विधान पद्धतिः**" प्रभृतीनि पुष्पाण्यपि झटित्येव प्रकाशितानि भविष्यन्ति ।

यद्यस्मिन्नभिनवे संस्करणे मानवस्वभाव सुलभाः काश्चनस्त्रुटयस्स्युस्तर्हि विज्ञैः सूचयितव्या येनाग्रिमे संस्करणे ताः संशोधयितव्यास्युः ।

रतनगढ़ (राजस्थान)
आषाढ शुक्ला १५
(गुरु पूर्णिमा)
सं० २०१३

विद्वज्जनानुचरः
पण्डित श्रीचतुर्थीलालतनुजो
गंगाधरशर्मा तामड़ायतः ।

अथ उपाकर्म पद्धत्यनुक्रमणिका ।

इत्यनुक्रमणिका ।

ॐ

नमः शिवाय ।

त्रैवर्णिकानां—

उपाकर्म पद्धतिः ।

"कर्मठानखिलान्नत्वा, स्मृत्वा शिवपदाम्बुजम् ।
उपाकृतिमहं कुर्वे, विदुषां मोददायिनीम् ॥ १ ॥"

तत्र तावत् प्रातः स्नानसन्ध्यादि नित्यावश्यकं कर्म समाप्य, गुरुः शिष्यैः सह ग्रामाद्बहिः प्राच्यामुदीच्यां वा यथासम्भवं नदीतडागादिरम्यं समुचितं जलाशयमुपपद्य, तत्तीरं प्रक्षाल्य तत्र तीर्थादि शुभ्रां मृदमार्द्रं गोमयं भस्मकुशांस्तिलयवतण्डुलान्पुष्पाणि दूर्वाऽङ्कुरापामार्गादि सर्वां सामग्रीं संस्थाप्य, कृताञ्जलिः प्रवाहाभिमुखः—" ॐ तीर्थवर्य ! दयासिन्धो ! त्वामहं शरणंगतः । सर्वस्माद् वृजिनाद्विष्वग् परिपाहि नमो-

---

१ गोभिलगृह्यभाष्ये—" उपाक्रियते प्रारभ्यते वेदस्याध्ययनं येन कर्मणा तदुपाकरणं नाम कर्मविशेषो विद्यासंस्कारकः " इति ।

तत्र उपाकर्मकालः—'श्रावण्यां पौर्णमास्यां, श्रावणस्य शुक्लपञ्चम्यां वा । तत्र श्रवणयुक्त पौर्णमास्यां मुख्यकालः । ग्रहण संक्रान्त्यादि सम्भवे गणस्नानं न कुर्यात् ।'

तदुक्तं रेणुका दीक्षित कारिकायाम्-" संक्रान्तौ ग्रहणे चैव सूतके मृतकेऽपि वा । गणस्नानं न कुर्वीत नारदस्य वचो यथा ।' गणस्नानशब्देनोत्सर्गाख्यं कर्म ग्राह्यम् ।

इत्थं पूर्णिमायामसम्भवे श्रावण पञ्चम्यां कार्यम्-संग्रहेस्मृति महार्णवे-

ऽस्तुते ॥ त्वमेको जगतां पापपुञ्जविध्वंसने पटुः । समुत्तारय पापेभ्यस्त्वमद्य शरणागतम्"॥ इति सम्प्रार्थ्य तीर्थजलेन स्वात्मानं प्रोक्षमाणः— "ॐ पुनन्तु॑मा दे॒वजनाः॑ पुनन्तु॒ मन॑साधियः॑ । पुनन्तु॒ विश्वा॑भूतानि॒ जात॑वेदः॒ पुनी॒हि मा॑ " ॥ इति पठेत् ।

ततस्तीर्थमृत्स्नामादायः—" ॐ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे । उद्धृताऽसि वराहेण कृष्णेन शतबाहुना ॥ मृत्तिके ब्रह्मपूताऽसि कश्यपेनाभिवन्दिता । मृत्तिके ! हर मे पापं यन्मया दुष्कृतं कृतम् " ॥ इति मंत्रेणाभिमंत्र्य ललाटे मृदा तिलकं विधाय हस्तौ पादौ च प्रलिप्य तस्माच्चतुरो मृत्पिण्डानञ्जलिना

—च--'संक्रान्तिर्ग्रहणं वापि पौर्णमास्यां यदा भवेत् । उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः ।'

तत्र विशेषः--' अर्धरात्रादधस्ताच्चेत्संक्रान्तिर्ग्रहणं तदा । उपाकर्म न कुर्वीत--परतश्चेन्न दोषकृत् ।'' इति गार्ग्य वचनात्संक्रान्ति ग्रहणदोषस्तु अर्द्धरात्रादर्वाङ्न तु परतः । सर्वत्र ओषधिप्रादुर्भावस्त्वावश्यकः । ओषधीनां प्रादुर्भावे श्रवणेनेति भगवता पारस्कराचार्येण सूत्रणात् । श्रावणमासे सर्वथा विघ्नदोष संभवे भाद्रपद पूर्णिमायां पंचम्यां वा कार्यम् ।

एतदुपाकर्म पूर्वाह्णे कार्यम्--' भवेदुपाकृतिः पौर्णमास्यां पूर्वाह्ण एव तु । ' इति प्राचेतसोक्तेः ।

उपाकर्मणि नद्यादीनां रजोदोषो न विद्यते--' उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च । चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते । '

उपाकर्म फलमाह कात्यायनः–' प्रत्यब्दं यदुपाकर्म सोत्सर्गं विधिवद्द्विजैः । क्रियते छन्दसां तेन पुनराप्यायनं भवेत् ॥ अस्थानोच्छ्वासविच्छेद घोषणाध्यापनादिकम् । प्रामादिकं श्रुतौ यत्स्याद्यातयामत्व कारितात् । ' इति ।

बहिर्निक्षिपेत् । अथ पञ्चगव्यविधिः--ततः पञ्चगव्यार्थे पात्रे गोमूत्रं निक्षिपन्--[२] " ॐ तत्सवितुर्वरेण्यम्भर्गोदेवस्य धीमहि धियो योनः प्रचोदयात् " ॥ **इति पठेत् ।**

ततस्तस्मिन्नेवपात्रे गोमयं निक्षिपन्--" ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् " ॥ **इति पठेत् ।**

ततस्तस्मिन्नेवपात्रे क्षीरं निक्षिपन्--"ॐआप्यायस्वसमेतु ते विश्वतः सोमवृष्ण्यम् । भवावाजस्य सङ्गथे " ॥ **इति पठेत् ।**

ततस्तस्मिन्नेवपात्रे दधि निक्षिपन्--"ॐदधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवाजिनः ।सुरभिनोमुखाकरत्प्रण आयू ᳪ षि तारिषत् " ॥ **इति पठेत् ।**

ततस्तस्मिन्नेवपात्रे आज्यं निक्षिपन्--"ॐ तेजोऽसिशुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि"॥**इति पठेत् ।**

---

१ कारिकायाम्--' मृदक्षतकुशान्दूर्वापामार्गौ गोमयं तिलान् । यज्ञोपवीतं गन्धादीनादायोदकमाव्रजेत् ॥ तिथ्यादिकल्पितं कालं स्मृत्वा शिष्यैर्गुरुः सह । एकान्तमुदकं गत्वा तटं प्रक्षाल्य पाणिना ॥ तत्र संस्थापयेत्सर्वं यथादेशं पृथक् पृथक् । कृत्वात्र विधिवत्स्नानं नित्यकर्मविधिं तथा ॥ '

२ "गायत्र्याऽऽदाय गोमूत्रं गन्धद्वारेति गोमयम् । आप्यायस्वेति च क्षीरंदधिक्राव्णेति वै दधि । तेजोसि शुक्रमस्याज्यं देवस्यत्वा कुशोदकमिति कात्यायनः॥'

वशिष्ठः--' गोमूत्रे वरुणो देवो हव्यवाहस्तु गोमये । क्षीरे शशधरो देवो वायुर्दध्नि समाश्रितः ॥ भानुः सर्पिषि संदिष्टो कुशे ब्रह्मादिदेवता । जले साक्षाद्धरिः संस्थः पवित्रं तेन नित्यशः ॥ ' ' पलमात्रन्तु गोमूत्रमंगुष्ठार्धन्तु गोमयम् । क्षीरं सप्तपलं ग्राह्यं दधि त्रिपलमीरितम् ॥ सर्पिस्त्वेकपलं देयमुदकं पलमात्रकम् । सर्वमेतत्ताम्रपात्रे स्थितं कुर्याद्यथाविधि ॥ '

ततः कुशोदकेन तानि मेलयन्–"ॐ देवस्यत्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्" इति पठेत् ।

अथ पंचगव्य प्राशनम्–

ततः सर्वेजनाः स्वाञ्जलौ किञ्चिद् किञ्चिद् पञ्चगव्यं गृहीत्वा–"ॐ यन्ममास्थिगतं पापं देहे तिष्ठति यच्च मे । प्राशनात्पंचगव्यस्य दहत्वग्निरिवेन्धनम्" ॥ इति मन्त्रं पठन् त्रिः पिबेत् ।

ततो हस्तौ प्रक्षाल्य स्थले तिष्ठन् स्वदक्षिणहस्तस्याऽनामिकायां कुशद्वयात्मकं वामहस्तस्याऽनामिकायां कुशत्रयात्मकं पवित्रं धारयमाणः–"ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यरश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम्" ॥ इति पठेत् ।

ततः सपवित्रो मुक्ताङ्गुष्ठकनिष्ठस्य दक्षिण करस्याङ्गुष्ठमूले जलं माषमितं निधाय निधाय–'ॐ केशवाय नमः' ।

---

१ 'गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । निर्दिष्टं पञ्चगव्यं तु पवित्रं कायशोधनम् ॥'

२ 'द्वौ दर्भौ दक्षिणे पाणौ वामे पाणौ कुशत्रयम् । शिखायां पादमूले च सकृद्यज्ञोपवीतके ॥'

तथा च सुमन्तुः–'समूलाग्रौ विगर्भौ तु कुशौ द्वौ दक्षिणे करे । सव्ये चैव तथा त्रीन्वै बिभृयात् सर्वकर्मसु ॥'

३ कात्यायनः–'सपवित्रेण हस्तेन कुर्यादाचमनक्रियाम् । नोच्छिष्टं तत्पवित्रं तु भुक्तोच्छिष्टं तु वर्जयेत् ॥' इति ।

कात्यायन स्मृतौ च–'सव्यः सोपग्रहः कार्यो दक्षिणः सपवित्रकः । उभयत्र स्थितैर्दर्भैः समाचामति यो द्विजः । सोमपानं फलं तस्य भुक्त्वा यज्ञफलं भवेत् ॥'

४ नागदेवः–'संहतांगुलिना तोयं गृहीत्वा पाणिना द्विजः । मुक्तांगुष्ठकनिष्ठेन–

'ॐ माधवाय नमः' । 'ॐ नारायणाय नमः' । इति त्रिभिर्मन्त्रै-
स्त्रिराचम्याऽङ्गुष्ठमूलेन मुखं सम्प्रोञ्छ्य -'ॐ हृषिकेशाय नमः' ।
इत्यन्तिमेन मन्त्रेण हस्तौ प्रक्षाल्य दक्षिणकर्णं स्पृशन्
गायत्र्या त्रिः प्राण यामं कुर्यात् ।

ततो दक्षिणहस्ते कुशत्रयमादाय तेनानीताभिरद्भि-
रात्मानं प्रोक्षमाणः-"ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि
वा । यः स्मरेत्पुण्डरीकाक्षं स वाह्याभ्यन्तरः शुचिः" ॥ इति पठित्वा
गुरुः शिष्यैः सह पूर्वमुख उदङ्मुखो वा प्राञ्जलिः सन्
मङ्गलोच्चारणं कुर्यात् ।

अथ मङ्गलोच्चारण मन्त्राः ।

'ॐ श्रीमन्महागणाधिपतये नमः' । 'श्रीलक्ष्मीनारायणाभ्यां नमः' ।
'श्रीमदुमामहेश्वराभ्यां नमः' । 'श्रीवाणीहिरण्यगर्भाभ्यां नमः' । 'श्रीशची-
पुरन्दराभ्यां नमः' । 'श्रीगुरुभ्यो नमः' । 'श्रीसरस्वत्यै नमः' ।
'श्रीवेदाय नमः' । 'श्रीवेदपुरुषाय नमः' । 'श्रीइष्टदेवताभ्यो नमः'
श्रीकुलदेवताभ्यो नमः' 'श्रीग्रामदेवताभ्यो नमः' 'श्रीस्थानदेवताभ्यो

-शेषेणाचमनं चरेत् । मापमात्र सुवर्णस्य यत्र मज्जति वै मणिः । एतदाचमनं प्रोक्तं पवित्रं काय शोधनम् ॥'

तथा च याज्ञ० स्मृतौ-' हृत्कण्ठतालुगाभिस्तु यथा संख्यं द्विजातयः । शुद्ध्येरन् स्त्रीच शूद्रश्च सकृत्स्पृष्टाभिरन्ततः ॥' इति ।

१ 'गङ्गा च दक्षिणे श्रोत्रे नासिकायां हुताशनः उभयोः । स्पर्शने चैव तत्क्षणादेव शुद्ध्यति ।'

'अग्निरापश्च वेदाश्च सोमः सूर्योऽनिलस्तथा । सर्वे देवाश्च विप्रस्य कर्णे तिष्ठन्ति दक्षिणे ॥'

२ 'सर्वमङ्गलमांगल्यं वरेण्यं वरदं विभुम् । नारायणं नमस्कृत्य सर्वकर्माणि कारयेत् ॥' इति ।

नमः' । 'श्रीतीर्थदेवताभ्यो नमः' । 'श्रीवास्तुदेवताभ्यो नमः' । 'श्रीएतत्कर्मप्रधानदेवताभ्यो नमः' । 'श्रीसर्वेभ्योदेवेभ्यो नमः' । 'श्रीसर्वेभ्योब्राह्मणेभ्यो नमः' । 'ॐ श्रीवरुणाय नमः' । 'निर्विघ्नमस्तु ।

"'ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥ १ ॥ धूम्रकेतुर्गणाध्यक्षोभालचन्द्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ २ ॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा । संग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥ ३ ॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ ४ ॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ ५ ॥ सर्वमङ्गलमङ्गल्ये[1] शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते ॥ ६ ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थो भगवान् मङ्गलायतनो हरिः ॥ ७ ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ ८ ॥ विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् । सरस्वतीं प्रणम्यादौ सर्वकार्यार्थसिद्धये ॥ ९ ॥ सर्वेष्वारब्धकार्येषु त्रयस्त्रिभुवनेश्वराः । देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥ १० ॥ वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ ११ ॥ वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे । यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १२ ॥ गणनाथं नमस्कृत्य नमस्कृत्य पितामहम् । विष्णुं रुद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम् ॥ १३ ॥ स्थानं क्षेत्रं नमस्कृत्य दिननाथं निशाकरम् । धरणीगर्भसम्भूतं शशिपुत्रं बृहस्पतिम् ॥१४॥ दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं महाग्रहम् । राहुं केतुं नमस्कृत्य यज्ञारंभे विशेषतः ॥१५॥ शक्रादिदेवताः सर्वान्नृषींश्चैव तपोधनान् । गर्गं मुनिं नमस्कृत्य

---

१ 'माङ्गल्ये' इत्यपिपाठः ।

नारदं पर्वतं तथा ॥ १६ ॥ वसिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलम् । अगस्त्यं च पुलस्त्यं च दक्षं मित्रं पराशरम् ॥ १७ ॥ भरद्वाजं च माण्डव्यं याज्ञवल्क्यं च गालवम् । अन्ये विप्रा स्तपो युक्ता वेदशास्त्र विचक्षणाः ॥ १८ ॥ तात्सर्वान्प्रणिपत्याहमिदं कर्म समारभे । अग्रतः श्रीनृसिंहश्च पृष्ठतो देवकी सुतः । रक्षतां पार्श्वयोर्देवौ भ्रातरौ रामलक्ष्मणौ ॥ १९ ॥

इति नत्वा कुशहस्ता बद्धशिखाः-स्वदक्षिणहस्ते संकल्पार्थं जलाक्षतद्रव्यं कुशत्रयश्चादाय सर्वेपूर्वाभिमुखाःसंकल्पं कुर्युः।

अथ हेमाद्रि संकल्पः—

तद्यथा—"ॐ विष्णुः ३ ॐ स्वस्ति श्रीमुकुन्दसच्चिदानन्द-रूपिणोऽनिर्वाच्यमायाशक्ति विजृम्भिताविद्यायोगात् कालकर्मस्वभावाविर्भूत-महत्तत्त्वोदिताऽहङ्कारत्रितयोद्भूतवियदादि पञ्चमहाभूतेन्द्रियदेवतानिर्मिते अंडकटाहे, चतुर्दशलोकात्मके लोके, लीलया तन्मध्यवर्तिभगवतः श्रीनारा-यणस्य नाभिकमलोद्भूत सकल लोकपितामहस्य ब्रह्मणः सृष्टिं कुर्वतस्तदुद्ध-रणायप्रजापतिप्रार्थितस्यसमस्तजगदुत्पत्तिस्थितिलयकारणस्यजगद्रक्षाशिक्षाविच क्षणस्यप्रणतपारिजातस्य अच्युतानन्तवीर्यस्य श्रीमद्भगवतोमहापुरुषस्य अचि न्त्यापरिमितशक्त्या ध्रियमाणानां महाजलौघमध्ये परिभ्रममाणानामनेककोटि ब्रह्माण्डानामेकतमेऽव्यक्तमहदहङ्कारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृते, अस्मिन्महति ब्रह्माण्डखण्डे, आधारशक्ति श्रीमदादिवाराहदंष्ट्राग्रविराजिते, कूर्मानन्तवासुकितक्षक कुलिककर्कोटकपद्ममहापद्मशंखद्यष्टमहानागैर्ध्रियमाणे, ऐरावतपुण्डरीकवामनकुमुदाञ्जनपुष्पदन्तसार्वभौमसुप्रतीकाष्टदिग्गजप्रतिष्ठिते, अतलवितलसुतलतलातलमहातलरसातलपातालाख्य सप्तलोकानामुपरिभागे,

---

१ 'कन्यादाने नदीस्नाने महासंकल्पमुच्चरेत् ।' इति ।

वृद्धयमः--' संकल्प एव मुख्यः स्यात्स्नानदानादिकर्मसु । कर्म संकल्परहितं तत्सर्वं निष्फलं भवेत् '' इति ।

भूर्लोक भुवर्लोक स्वर्लोक महर्लोक जनलोक तपोलोक सत्यलोकाख्यसप्त लोकानामधोभागे, चक्रवालशैलमहावलय नगमध्यवर्तिनो महाकाल महाफणिराजशेषस्य सहस्रफणानां मणिमण्डलमण्डिते, दिग्दन्ति शुण्डादण्डोत्तम्भिते,अमरावत्यशोकवती भोगवती सिद्धवती गन्धर्ववती काञ्चयवन्त्यलकावती यशोवती पुण्यपुरीप्रतिष्ठिते, इन्द्राग्नियमनिर्ऋतिवरुणवायुकुबेरेशानाष्टदिक्पालप्रतिष्ठिते, धरध्रुवाधरसोमपाप्रभञ्जनानलप्रत्यूषप्रभासाख्याष्टवसुभिर्विराजिते, हरत्र्यम्बकरुद्रमृगव्याधापराजितकपालिभैरव शम्भुकपर्दिवृषाकपि बटुरूपाख्यैकादशरुद्रैः संशोभिते, रुद्रोपेन्द्र सवितृधातृ विष्णुत्वष्ट्र्यमेन्द्रेशान भगमित्रपूषाख्य द्वादशादित्य प्रकाशिते, यमनियमासन प्राणायाम प्रत्याहार धारणाध्यान समाध्यष्टाङ्गनिरतवसिष्ठ वालखिल्य विश्वामित्र दक्ष कात्यायन कौण्डिन्य गोतमाङ्गिरस पराशर व्यास वाल्मीकि शुकशौनक भरद्वाज सनक सनन्दन सनातन सनत्कुमार नारदादि मुख्यमुनिभिः पवित्रिते, लोकालोकाचलवलयिते, लवणेक्षुरस सुरासर्पि दधिक्षीरोदक युक्त सप्तार्णव परिवृते, जम्बूप्लक्ष शाल्मलि कुश क्रौञ्च शाक पुष्कराख्य सप्तद्वीपयुते. इन्द्रकांस्यताम्रगभस्ति नाग सौम्य गन्धर्व चारण भारतेति नवखण्डमंडिते, सुवर्णगिरिकर्णिकोपेत महासरोरुहाकारपञ्चाशत्कोटि योजनविस्तीर्णभूमण्डले, अयोध्या मथुरा माया (**हरिद्वार**) काशीकाञ्चयवन्तिका द्वारावतीति सप्तपुरीप्रतिष्ठिते, महामुक्तिपदस्थले, शालग्राम शम्भल नंदिग्रामेति ग्रामत्रयविराजिते, चम्पकारण्य वदरिकारण्य दण्डकारण्यार्बुदारण्य धर्मारण्य पद्मारण्य गुह्यारण्य जम्बुकारण्य विन्ध्यारण्य द्राक्षारण्य नहुषारण्य काम्यकारण्य द्वैतारण्य नैमिषारण्यादीनांमध्ये,सुमेरुनिषधकूट शुभ्रकूट श्रीकूट हेमकूट रजतचित्रकूट त्रिकूट किष्किन्धश्वेताद्रिकूट हिमविन्ध्याचलानां हरिवर्ष किंपुरुष वर्षयोश्च दक्षिणे, नव सहस्रयोजनविस्तीर्णे भरतखण्डे, मलयाचलसह्याचलविन्ध्याचलानामुत्तरेणस्वर्णप्रस्थचन्द्रप्रस्थ शुक्ल सूक्तिकावर्तकरमणकमहारमणक पाञ्चजन्यसिंहललङ्काऽशोकवत्यलकावती सिद्धवती गान्धर्ववतीत्यादि पुण्यपुरीविराजिते नवखण्डो-

पद्वीपमण्डिते, दक्षिणावस्थित रेणुकाद्भय सूकर काशीकाञ्चीकालिकालवटेश्वरकालञ्जर महाकालेति नवोषरयुते, द्वादशज्योतिर्लिङ्ग गङ्गा (भागीरथी) गोदावरी–क्षिप्रा–यमुना सरस्वती–नर्मदा–तापी–पयोष्णी-चन्द्रभागा–कावेरी–मन्दाकिनी–प्रवरा–कृष्णा–वेणी–भीमरथी–तुङ्गभद्रा–मलापहा–कृतमाला–ताम्रपर्णी–विशालाक्षी–वंजुला–चर्मण्वती– वेत्रवती–भोगवती–विशोका–कौशिकी गण्डकी–वासिष्ठी–प्रमदा–विश्वामित्री–फल्गुनी–चित्रकाश्यपी–सरयू–सर्वपापहारिणी करतोया–प्रणीता–वज्रा–वक्रगामिनी–सुवर्णरेखा–शोणाभवनाशिनी–शीघ्रगा–कुशावर्तिनी– ब्रह्मानन्दा–महितन–येत्यनेकपुण्यनदीभिर्विलसिते, ब्रह्मपुत्रसिन्धुनदादि परमपवित्रजलविराजिते, हिमवन्मेरुगोवर्धनक्रौञ्च चित्रकूट हेमकूट महेन्द्रमलयसह्येन्द्रकीलपारियात्राद्यनेक पर्वत समन्विते, मतङ्गमाल्यकिष्किन्ध ऋष्यशृङ्गे ति महानगसमन्विते, अङ्ग वङ्ग कलिङ्ग काश्मीर कांबोज सौवीर सौराष्ट्र महाराष्ट्र राजस्थान मगध नेपाल केरल चोरल पाञ्चाल गौडमालव मलय सिंहल द्रविड कर्नाटक ललाटक रहाटवर हाटपानाट पाण्ड्य सारस्वत निषध मागधान्ध्र दशार्ण भोज कुरुगान्धार विदर्भ विदेह बाल्हीक बर्बर कैकय कोसल विराट् शूरसेन कोङ्कण कैकट मत्स्यभद्र पारसीक खर्जूर यवनम्लेच्छ जालन्धरेत्यादि नानादेश विराजिते, नानाभाषाभाषि भूमिपालविचित्रिते, इलावृत कुरुभद्राश्व केतुमाल किं पुरुष रमणक हिरणमयादि नवखण्डानां मध्ये, भरतखण्डे, बकुलचम्पक पाटलाब्ज पुन्नागजाति करवीर रसाल कल्हार केतक्यादि नानाविध कुसुमस्तवक विराजिते, कोकन्तहिरण्यश्रृङ्गकुब्जार्बुदमणिकर्णी वटशालग्रामसूकर मथुरा गया निष्क्रमण लोहार्गलपोत स्वामि प्रभासवदरीति चतुर्दशगुह्य विलसिते, जम्बूद्वीपे कुरुक्षेत्रादि समभूमध्यरेखायाः अमुकदिग्भागे, कुलमेरोर्दक्षिणदिग्भागे, विन्ध्यस्य अमुकदिग्भागे, श्रीगङ्गायमुनयोरमुकदिग्भागे, (दक्षिणे भागे) मत्स्यकूर्मवराह नृसिंहवामन परशुराम रामकृष्ण बुद्धकल्कीति

दशावताराणां मध्ये, बौद्धावतारे, गङ्गादिसरिद्भिः पाविते, एवं नव सहस्र योजन विस्तीर्णे भारतेवर्षे, निखिलजनपावन परम भागवतोत्तम शौनकादि निवासितेनैमिषारण्ये,आर्यावर्तान्तर्गतब्रह्मावर्तैकदेशेसोमसूर्यान्वयभूभृत्प्रतिष्ठिते, तदन्तर्गते मरुदेशेऽमुकनगरे (**श्रीबीकानेरमण्डलान्तर्गत रतन-गढ नाम्नि नगरे** श्रीमन्नारायणनाभिकमलोद्भूतसकलजग-त्स्रष्टुः परार्द्धद्वय जीविनो ब्रह्मणो द्वितीये परार्धे एकपञ्चाशत्तमे वर्षे, प्रथम मासे प्रथमपक्षे, प्रथमदिवसे, अह्नो द्वितीये यामे, तृतीय मुहूर्ते, रथन्तरादि-द्वात्रिंशत्कल्पानां मध्ये अष्टमे श्वेतवाराहकल्पे, स्वायम्भुवादिमन्वन्तराणां मध्ये सप्तमे वैवस्वतमन्वन्तरे, कृतत्रेताद्वापरकलिसंज्ञकानां चतुर्णां युगानां मध्ये वर्तमाने अष्टाविंशतितमे कलियुगे, तत्प्रथमे चरणे (**पादे**) चान्द्रसंज्ञकानां प्रभवादिषष्टिसम्वत्सराणां मध्ये अमुकनाम्नि सम्वत्सरे, श्रीमन्नृपविक्रमार्कादमुकसंख्याके सम्वत्सरे, उत्तरगोलावलम्बिनि श्रीमार्तण्ड मण्डले, अमुकर्तौ (**वर्षर्तौ**) अमुकमासे, (**श्रावणे मासे**) अमुक पक्षे, (**शुक्लपक्षे**) अमुकतिथौ (**पूर्णिमायां**) अमुकनक्षत्रे, अमुकयोगे, अमुककरणे, अमुकराशिस्थिते चन्द्रे, अमुकराशिस्थिते सूर्ये, अमुकराशिस्थिते देवगुरौ, शेषेषु ग्रहेषु, यथा यथा स्थानस्थितेषुसत्सु, एवं ग्रहगुण विशेषण विशिष्टायां शुभ पुण्यतिथौ, अमुकगोत्रः अमुकशर्माहं (**वर्मा गुप्तोहं वा**)

---

१ अद्यत्वे केचन सम्भ्रान्ता अपि कर्मादौ सङ्कल्पे चान्द्रसम्वत्सरं विहाय केवलं विक्रमार्क सम्वत्सरमेव गृणन्ति केचन चोभयमिति विलोक्यते। तत्राऽयं निर्णयः—कर्मादौ सङ्कल्पे चान्द्र वत्सरोच्चारणमेव वैधम्। उभयोच्चारणे तु नह्यदृष्टे हानिः प्रतीयते। तदुक्तं धर्मसिन्धौ—"शुक्लप्रतिपदादिदर्शान्तैश्चैत्रादिसंज्ञकै-र्द्वादशभिर्मासैश्चतुः पञ्चदशाधिक शतत्रयदिनैः सति मलमासि त्रयोदशभिर्मासै-श्चान्द्रोवत्सरः। चान्द्रस्यैव प्रभवो विभवः शुक्ल इत्यादयः षष्टि संज्ञाः।

कर्मादौ सङ्कल्पे चान्द्रवत्सर एव स्मर्तव्यो नाऽन्यः। तदुक्तं निर्णयसिन्धा-वपि—आर्षिपेण—"स्मरेत्सर्वत्र कर्मादौ चान्द्रं सम्वत्सरं सदा। नाऽन्यं यस्मा-द्वत्सरादौ प्रवृत्तिस्तस्य कीर्तिता" इति।

'मम इह जन्मनि जन्मान्तरे वा बाल्ययौवनवार्द्धक्यावस्थासु वाक्पाणिपाद-पायूपस्थघ्राणरसनाचक्षुः स्पर्शन श्रोत्रमनोबुद्धिभिश्चरितानां, ज्ञाताज्ञातकामाकाम महापातकोपपातकादि सञ्चितानां पापानां,ब्रह्महनन सुरापानसुवर्णस्तेय गुरुतल्पगमनतत्संसर्गरूपमहापातकानां, गोहननस्तेयकरणनरेन्द्राज्ञाभंगश्रोत्रियविप्रादिमानभंगबुद्धिपूर्वकबहुकालाधीताभ्यस्तशास्त्रविस्मरणादीनामुपपातकानां च, स्पृष्टास्पृष्टसङ्करीकरण मलिनीकरणापात्रीकरण जातिभ्रंशकरण विहिताकरण कर्मलोपजनितानां, रसविक्रय कन्याविक्रय हयविक्रय गोविक्रय खरोष्ट्रविक्रय दासीविक्रय अजादिपशुविक्रय स्वगृहविक्रय नीलीविक्रयाक्रेयविक्रय पण्यविक्रय जलचरादि जन्तुविक्रय स्थलचरादिविक्रय खेचरादिविक्रय सम्भूतानां, निरर्थकाद्रवृक्षच्छेदन ऋणानपाकरण ब्रह्मस्वापहरण देवस्वापहरण राजस्वापहरण परद्रव्यापहरण तैलादिद्रव्यापहरण फलादिहरण लोहादिहरण नानाविधवस्तुहरणरूपाणां, ब्राह्मणनिन्दा गुरु निन्दा वेदनिन्दा—शास्त्रनिन्दा परनिन्दा-अभक्ष्यभक्षणाऽभोज्यभोजना चोष्यचोषणालेह्यलेहनापेयपानाऽस्पृश्यस्पर्शना श्राव्यश्रवणाहिंस्यहिंसन-

---

१ 'ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः । महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥'

अन्यश्च-'ब्रह्मघ्नश्चगोघ्नश्च स्वर्णस्तेयी च मद्यपः । तत्संसर्गी पञ्चमश्च उग्रपापाः प्रकीर्तिता ।'

२ उपपातकानि गोवधादीनि मन्वादिषु द्रष्टव्यानि ।

३ मनुः—"खराश्वोष्ट्र मृगेभानामजाविकवधस्तथा । संकरीकरणं ज्ञेयं मीनाहिमहिषस्य च" ॥

४ "कृमिकीटवयोहत्या मद्यानुगत भोजनम् । फलैधः कुसुमस्तेयमधैर्यं च मलावहम्" ।

५ "निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम् । अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम्" ॥

६ "ब्राह्मणस्य रुजः कृत्या घ्रातिरघ्रेयमद्ययोः । जैह्मं च मैथुनं पुंसि जातिभ्रंशकरं स्मृतम्" ॥ इति ।

वन्द्यवन्दना चिन्त्यचिन्तना याज्ययाजना पूज्यपूजन पूज्यपूजाऽत्यतिक्रमण रूपाणां, मातृपितृ तिरस्कार स्त्रीपुरुष प्रीतिभेदन परस्त्रीगमन–विधवागमन–दासीगमन–वेश्यागमन–चाण्डालादिहीनजातिगमन–गुदगमन–रजस्वलागमन–पश्वादिगमनरूपाणां पशुसमानविहरणरूपाणां च, कूटसाक्षित्वपैशुन्य वादमिथ्यापवादम्लेच्छसम्भाषण ब्रह्मद्वेषकरण ब्रह्मवृत्तिहरणब्रह्मवृत्तिच्छेदन परवृत्तिहरणरूपाणां, मित्रवंचन गुरुवंचन स्वामिवंचन भार्यावंचनाऽसत्यभाषण गर्भपातनपथिताम्बूलचर्वण हीनजातिसेवन परान्नभोजन गणान्नभोजन गणिकान्नभोजन लशुनभक्षण पलाण्डुभक्षण गृञ्जनभक्षण तालवृक्षफलभक्षणोच्छिष्टभक्षण पर्य्युषितान्नभक्षणरूपाणाम्, पंक्तिभेदकरण भ्रूणहिंसा पशुहिंसा बालहिंसा पिपीलिकादि जन्तुहिंसा पक्षिहिंसा स्त्रीहिंसाद्यनेकहिंसोद्भूतानां, शौचत्याग स्नानत्याग सन्ध्यात्यागोपासनाग्नित्याग वैश्वदेवत्यागरूपाणां, निषिद्धाचरणकुग्रामवासब्रह्मद्रोह गुरुद्रोह परद्रोह पितृद्रोह मातृद्रोह परनिन्दात्मस्तुति दुष्टप्रतिग्रहदुर्जन संसर्गरूपाणां, गोयानवृषभयान महिषयान गर्दभयानोष्ट्रयानाजयानादि दुर्यानारोहण–भृत्यामरण स्वग्रामत्याग गोत्रत्याग कुलत्याग दूरस्थमंत्रणविप्राशाभेदनावन्दिताऽऽशीर्वाद ग्रहण-पतितसम्भाषणरूपाणां, पतितजनपंक्तिभोजनाहः सङ्गमवृथामनोरथादिपापानाम्, आत्मार्थं पाककरणैकाकीमिष्टान्नभोजन बालकादिसह भोजनात्म-स्त्रीसह भोजनेत्यादिप्रकीर्णपातकानां, नानायोनिष्वद्यावधिकृतानां परभयोत्पादनादिप्रकीर्णपातकानाम्, एतत्कालपर्यन्तं सञ्चितानामार्द्रशुष्कगुरुलघु-स्थूलसूक्ष्माणां पापानां च निः शेषपरिहारार्थं, सहस्रगोदानकुरुक्षेत्रादिसर्वतीर्थस्नानजन्यफलप्राप्त्यर्थं मम समस्तपितृणामात्मनश्च विष्णवादिलोक-

---

१. संग्रहे:–' अपूज्या यत्र पूज्यन्ते पूज्यानान्तु व्यतिक्रमः त्रीणि तत्र प्रवर्तन्ते दुर्भिक्षं मरणं भयम् ॥ '

२ श्रीमद्भागवते–' स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेच्चयः । षष्टिवर्षसहस्राणि विष्टायां जायते क्रमिः ॥

प्राप्तये, अधीतानामध्येष्यमाणानां चाध्यायानां स्थापन विच्छेदक्रोशघोषण-दन्तविवृतिदुर्वृत्तद्रुतोच्चारितवर्णानां, पूर्वसवर्णानां गलोपलम्बितविवृतोच्चारित-वर्णानां, श्लिष्टास्पष्टवर्णविघट्टनादिभिः पठितानां श्रुतीनां यथातयामत्वं तत्परिहारार्थम्, अष्टात्रिंशदनध्यायाध्ययने, रथ्यासञ्चरतः शूद्रस्य म्लेच्छा-न्त्यजादेर्वा शृण्वतोऽध्ययने, अशुचि देशेऽध्ययने, आत्मनोऽशुचित्वेऽध्ययने, अक्षरस्वरानुसार पदच्छेदकण्डिकाव्यञ्जनह्रस्वदीर्घप्लुतकण्ठतालुमूर्द्धन्यौष्ठ-यदन्त्यनासिकानुनासिकरेफजिह्वामूलीयोपध्मानीयोदात्तानुदात्तस्वरितलक्षण जातिगोत्रप्रयत्नोच्चारणे, माधुर्याक्षरव्यक्तिहीनत्वाद्यनेकप्रत्यवायपरिहारपूर्वकं, सर्वस्य वेदस्य सवीर्य्यत्वसम्पादनद्वारा यथावत्फलप्राप्त्यर्थं, श्रीपरमेश्वर प्रीत्यर्थञ्च देव ब्राह्मण सवितृ सूर्यनारायण सन्निधौ गङ्गाभागीरथ्याममुक-तीर्थे तडागे वा प्रवाहाभिमुखो (**सूर्याभिमुखो वा**) नाभिमात्रजले अध्यायोत्सर्गोपाकर्मनिमित्तं गणस्नानमहं करिष्ये ॥" **इति सङ्कल्प्य स्नानानुज्ञां प्रार्थयेत् ।**

अथ तीर्थ प्रार्थना ।

तद्यथा—"ॐ नमोऽस्तु देवदेवाय शितिकण्ठाय वेधसे । रुद्राय चापहस्ताय दंडिने चक्रिणे नमः ॥ १ ॥ सरस्वती च गायत्री वेदमाता गरीयसी । सन्निधात्री भव त्वं च सर्वपाप प्रणाशिनी ॥ २ ॥ सागर स्वन-निर्घोष ! दण्डहस्तसुरान्तक ! । जगत्स्रष्टर्जगन्मित्र ! त्वां नमाम्यसुरा-

---

१ विष्णुः—'स्रोतसोऽभिमुखं स्नायान्नदी प्रवहज्जले । स्थावरेषु च तडागे च खेरभिमुखं सदा ॥ स्रोतसोऽभिमुखो मज्जेद्यत्रापः प्रवहन्ति वै । स्थावरेषु च सर्वेषु आदित्याभिमुखस्तथा ॥'

तथाचरेणुः—'तडागादिषु तोयेषु प्रत्यर्कं स्नानमाचरेत् । नद्यादौतु प्रवाहाभि-मुखो वा स्नानमाचरेत् । नद्यां स्रवत्सु च स्नायात्प्रतिस्रोतस्थितो द्विजः । या याः समुद्रगा नद्यस्तासु स्नानं तु सम्मुखम् । सर्वेषां शाखिनामेवं विना वाज-सनेयिनाम् ॥'—

न्तक ! ॥ ३ ॥ तीक्ष्णदंष्ट्र ! महाकाय ! कल्पान्तदहनोपम ! । भैरवाय नमस्तुभ्यमनुज्ञांदातुमर्हसि ॥ ४ ॥ आपस्त्वमसि देवेश ज्योतिषां पतिरेव च । पापं नाशय मे देव मनोवाक्कायकर्मजम् ॥ ५ ॥ जान्हवी यमुना चैव नर्मदा चैव गौतमी । नदीभीमरथी चैव कृष्णा वेणी च तुङ्गजा ॥६॥ एताः सप्त महानद्यः स्नानकाले प्रकीर्तिताः । स स्नानफलमाप्नोति कोटियज्ञ-फलं लभेत् ॥ ७ ॥ त्र्यम्बकस्य जटोद्भूते गौतमस्याघनाशिनि । सप्तधा-सागरं यासि गोदावरि नमोऽस्तुते ॥ ८ ॥ नन्दिनी नलिनी सीता मालती च मलापहा । विष्णुपादाब्जसम्भूता गङ्गा त्रिपथगामिनी ॥ ९ ॥ भागी-रथी भोगवती जान्हवी त्रिदशेश्वरी । द्वादशैतानि नामानि यत्र यत्र जलाशये ॥ १० ॥ स्नानोद्यत पठेद्यस्तु तत्रैव निवसाम्यहम् । संजाता यस्य देवस्य पादप्रक्षालनोदकात् त्रैलोक्यपावनी गङ्गा माधवं तं नमाम्यहम् ॥ ११ ॥ पुष्कराद्यानि तीर्थानि गङ्गाद्याः सरितस्तथा । आगच्छन्तु पवित्राणि स्नानकाले सदा मम ॥ १२ ॥ त्वं राजा सर्वतीर्थानां त्वमेव जगतः पिता । याचितं देहि मे तीर्थ सर्वपापैः प्रमोचय ॥ १३ ॥ अपामधिपतिस्त्वं च तीर्थेषु वसतिस्तव । वरुणाय नमस्तुभ्यं स्नानानुज्ञां प्रयच्छ मे ॥ १४ ॥ गङ्गे ! च यमुने ! चैव गोदावरि ! सरस्वति ! ! नर्मदे ! सिन्धु ! कावेरि ! जलेऽस्मिन्सन्निधिं कुरु ॥"

इति स्नानानुज्ञां प्रार्थ्य जलाभिमंत्रणंकुर्यात ।

—एतेन वाजसनेयिनां समुद्रगामिनीषु नदीषु प्रवाहाभिमुखस्नाननिषेधेन तैः प्रत्यक्षसमुद्रसंगमवतीष्वपि गङ्गागोदावरीत्यादिनदीषु सूर्याभिमुखं स्नानं कर्त-व्यम् । समुद्रगाइत्युक्तत्वात् ।

गङ्गादिनदीसङ्गमपर्यन्तं प्रवाहनामादिधारकासु यमुना भीमातुङ्गभद्रादिषु तु स्वतः सागरगामित्वायोगात्प्रवाहाभिमुखमेव स्नानं कर्तव्यमिति प्रतिभाति ।

अथ जलाभिमन्त्रणम् ।

ततो उरु ॅं हि इत्यादि मंत्रेण न्युब्जाञ्जलिहस्तेन तोयमभिमन्त्रयेत्–" ॐ उरु ॅं ही त्यस्य शुनश्शेप ऋषिर्वरुणोदेवता त्रिष्टुप्छन्दः जलाभिमन्त्रणे [1]विनियोगः । ॐ उरु ॅं हिराजा व्वरुणश्चकार सूर्य्यायपन्थामन्वेंत वाऽउं । अपदे पादाप्रतिधातवेकरुतापवक्ता हृदयाव्विधश्चित् । नमो व्वरुणायाभिष्ठितो व्वरुणस्यपाशः" ॥ १ ॥

अथ जलावर्तनम् ।

ततो जलं दक्षिणहस्तेन त्रिर्दक्षिणावर्त्तमालोडयन्–" येते शतमिति मन्त्रस्य वामदेव ऋषिर्वरुणसवितृविष्णु विश्वमरुत्स्वर्का देवतास्त्रिष्टुप् छन्द स्तोयावर्तने विनियोगः । ॐ ये तेंशतं व्वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिंन्नोऽअद्य संवितोत व्विष्णुर्व्विश्वें मुञ्चन्तु मरुतः स्वर्काः" ॥ **इति पठेत ।**

---

१ ' विनियोगं विना मन्त्रः पङ्के गौरिव सीदति ।' इति प्रमाणतो विनियोगादिकस्य नित्यस्मर्तव्यता लभ्यते ।

उक्तं च याज्ञवल्क्येन–' ऋषिच्छन्दो देवतानां कर्म्मणे विनियोजनम् । विनियोगः स आदिष्टो मन्त्रे मन्त्रे प्रयुज्यते ॥' इति ।

" आर्षं छन्दश्च दैवत्यं विनियागस्तथैव च । वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः " ।

" अविदित्वा तु यः कुर्याद् यजनाध्यापनं जपम् । होममन्तर्जलादीनि तस्य चाल्पफलं भवेत् " ।

" येन यदृषिणा दृष्टं सिद्धिः प्राप्ता च येन वै । मन्त्रेण तस्य तत्प्रोक्तमृषेर्भावस्तदार्षकम् ।"

" यस्य यस्य तु मन्त्रस्य उद्दिष्टा देवता तु या । तदाकारं भवेत्तस्य देवत्वं देवतोच्यते ।"

अथ जलाञ्जलिग्रहणम् ।

ततः—सुमित्रियान इति मन्त्रस्य प्रजापतिर्ऋषिरापो देवता यजुच्छन्दो जलग्रहणे विनियोगः । दुर्मित्रिया इत्यस्य प्रजापतिर्ऋषिरापो देवता यजुश्छन्दोऽञ्जलिप्रक्षेपे विनियोगः । "ॐ सुमित्रियानऽआपऽओष-धयःसन्तु" । इति ।

मंत्रेण जलाञ्जलिमादाय—"ॐ दुर्मित्रियास्तस्मैसन्तुयोंस्मान्द्वेष्टि यञ्चव्वयन्द्विष्मः" । इति मंत्रेणाऽञ्जलिस्थं जलं स्वशत्रून् कामादीन्वा मनसा विचिन्त्य तन्नाशार्थं स्ववामभागे तीर्थ तटे प्रक्षिप्य जलं स्पृशेत ।

अथ मृत्तिका स्नानम् ।

ततस्तीर्थीयां मृत्स्नां वामहस्ते गृहीत्वा दक्षिण हस्तेनाच्छाद्याभिमंत्रयेत । तद्यथा—"ॐ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे । उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥ मृत्तिके ब्रह्मपूतासि काश्यपेनाभिमंत्रिता । मृत्तिके ! हर मे पापं यन्मया दुष्कृतं कृतम् । त्वया हतेन पापेन लोकः पापैः प्रमुच्यते ॥" इत्यभिमन्त्र्य सूर्याय दर्शयित्वा पुनश्च तां भागत्रये विभज्य, तत्र प्रथमं भागं वामकरे कृत्वा जलेन लेपन योग्यं विधाय वामेन करेण नाभेरधः कटिप्रदेशं तेन लिम्पन्—"इदं विष्णुरित्यस्य मेधातिथिर्ऋषिः विष्णुर्देवता गायत्री छन्दः अनुलेपने विनियोगः ।" "ॐ इदँ व्विष्णुर्व्विचक्रमे त्रेधानि दधे पदम् । समूढमस्यपाꣳसुरे स्वाहा ।" इति पठेत

---

१ "कामः क्रोध स्तथा लोभो हर्षो मानो मदस्तथा ।"

ततो हस्तौ प्रक्षाल्य मृत्तिकाया वामकरेण द्वितीयंभाग-मादाय जलेन लेपनयोग्यं कृत्वा वाम हस्तेन वस्तिमुरू-जंघे चरणौ करौ च प्रत्येकं लेपयेत्।

तत्रमन्त्रः—" इदम्विष्णुरित्यस्य मेधातिथिर्ऋषिर्विष्णुर्देवता गायत्री छन्दो मृदनुलेपने विनियोगः। " ॐ इदँ विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पा ᳪ सुरे स्वाहा "।

ततः पूर्ववत्तस्या अवशिष्टं भागमादाय जलेन लेपन योग्यं च कृत्वा दक्षिणहस्तेन ललाटादि नाभिपर्यन्ताङ्गानि लिम्पन्—" इदं विष्णुरित्यस्य मेधातिथिर्ऋषिर्विष्णुर्देवता गायत्री छन्दो मृदनुलेपने विनियोगः। "ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पा ᳪ सुरे स्वाहा "। इति पठेत्।

ततश्शनैश्शनैर्नाभिमात्रं तीर्थजलं प्रविश्य सूर्याभिमुखः स्थित्वा स्नायात्।

तत्रमंत्रः—'आपोऽअस्मानित्यस्य प्रजापतिर्ऋषिरापोदेवताऽत्यष्टिश्छन्दो मज्जनोन्मज्जने विनियोगः। "ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु। विश्वꣳ हि रिप्रम्प्रवहन्ति देवीः "॥

इति मन्त्रेण निमज्य पुनः—" ॐ उदिदाभ्यः शुचिरा पूतऽएमि।" इति द्वितीयवारं निमज्य पुनस्तूष्णीं निमज्योन्मज्याचामेत्।

अथ गोमय स्नानम्।

ततो गोमयं वामहस्ते गृहीत्वा दक्षिण हस्तेना च्छाद्या भिमन्त्रयेत्। तत्रक्रमः— ' अग्रमग्रं चरन्तीनामोषधीनां वने वने।

तासां वृषभपत्नीनां पवित्रं कायशोधनम् । तन्मे रोगांश्च शोकांश्च पापं मे हर गोमय ।" इति गोमयमभिमंत्र्य सूर्याय दर्शयित्वा पुनश्च तं भागत्रये विभज्य, तत्र प्रथमं भागं वामकरे कृत्वा जलेन लेपन योग्यं च विधाय वामेन करेण प्रथमं भागं नाभेरधस्तात्, द्वितीयं भागं वक्षसोऽधस्तात्, तृतीयं भागं वक्षस उपरिष्टाद् वामेन करेण वामतो दक्षिणेन दाक्षिणतो ललाटान्तंलिम्पन्–' मानस्तोकइत्यस्यकुत्सऋषीरुद्रोदेवताजगती च्छन्दो गोमयेनाऽङ्गानुलेपने विनियोगः " ॐ मानस्तोके तनये मानऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः । मा नो व्वीरान्रुद्रभामिनो वधीर्हविष्मन्तःसदमित्त्वा हवामहे " इति प्रत्येकं लिम्पन् त्रिः पठेत् ।

ततो हस्तौ प्रक्षाल्य स्नात्वाऽऽचामेत ।

अथ भस्मस्नानम् ।

ततो याज्ञियं भस्माऽऽदाय सव्यहस्ते कृत्वा दक्षिणहस्तेनाच्छाद्याभिमन्त्रयेत ।

तत्रक्रमः–"भस्म ! त्वं गोमयोद्भूतं शङ्करस्याङ्गभूषणम् । सर्वं नाशय मे पापं वाङ्मनः कायकर्मजम् " । इत्यभिमंत्र्य सूर्याय दर्शयित्वा जलेन लेपनयोग्यं च कृत्वा ललाटादितिलकोचितमङ्गं लिम्पन्–" ॐ अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमिति भस्म सर्वं ठं हवा इदं भस्म मन एतानि चक्षू ठं षि भस्मानि । ॐ प्रसद्य भस्मना योनिमपश्चपृथिवीमग्ने । सं ठं सृज्ज्य मातृभिष्ट्वञ्ज्योतिष्मान्पुनरासदः " । इति पठित्वा स्नात्वाऽऽचामेत् ।

ततो वक्ष्यमाणैरष्टभिर्मन्त्रैः प्रतिमन्त्रं दर्भैः कुम्भमुद्रया शिरोऽभिषिञ्चेत् ।

अथ कुम्भमुद्रयाऽभिषेकः ।

तत्रक्रमः—इमंमेवरुणेति मन्त्रस्य शुनःशेप ऋषिर्वरुणो देवता गायत्री छन्दः तत्त्वायामीत्यस्य शुनः शेप ऋषिर्वरुणो देवता त्रिष्टुप्छन्दः । त्वन्नोऽअग्ने इति मंत्रस्य वामदेव ऋषिः अग्निवरुणौ देवते त्रिष्टुप्छन्दः । सत्वन्नो इत्यस्य वामदेव ऋषिः अग्नीवरुणौ देवते त्रिष्टुप् छन्दः । मापोमौषधीरित्यस्य प्रजापतिर्ऋषिः हृदयशूलं देवता यजुश्छन्दः । उदुत्तम-मिति मंत्रस्य शुनः शेपऋषिर्वरुणोदेवता त्रिष्टुप्छन्दः । मुञ्चन्त्विति मंत्रस्य आथर्वणो भिषग्बन्धुर्ऋषिरोषधयो देवता अनुष्टुप् छन्दः । अवभृथेत्यस्य प्रजापतिर्ऋषिर्यज्ञो देवता अनुष्टुप् छन्दः सर्वेषामभिषेके विनियोगः ।

" ॐ इमम्मे व्वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥ १ ॥ ॐ तत्त्वा यामि ब्ब्रह्मणा व्वन्दमानस्तदा शास्ते यजमानो हविर्भिः । अहेडमानो व्वरुणेह बोद्ध्युरुशꣳस मा न ऽआयुः प्प्रमोषीः ॥ २ ॥ ॐ त्वन्नोऽअग्ने व्वरुणस्य व्विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो व्विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् ॥ ३ ॥ ॐ सत्त्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ । अवयक्ष्व नो व्वरुणꣳ रराणो व्वीहि मृडीकꣳ सुहवो न एधि ॥ ४ ॥ मापो मौषधीर्हिꣳसीर्द्धाम्नो धाम्नो राजँस्ततो व्वरुण नो मुञ्च ॥ ५ ॥ ॐ उदुत्तमं व्वरुण

---

१ " दक्षाङ्गुष्ठं पराङ्गुष्ठे (वामाङ्गुष्ठ) क्षिप्त्वा हस्तद्वयेन तु । सावकाशां (मध्यशून्यां) मुष्टिकां च कुर्यात्सा कुम्भमुद्रिका " । इति ।

पाशमस्मदवाधमं व्विमध्यमᳬंश्रथाय । अथा वयमादित्य व्व्रते तवानागसो ऽअदितये स्याम ॥ ६ ॥ ॐ मुञ्चन्तु मा शपथ्यादथो व्वरुण्यादुत । अथो यमस्य पड्वीशात्सर्व्वस्माद्देव किल्विषात् ॥ ७ ॥ ॐ अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः । अव देवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्य-कृतं पुरुराव्णो देवरिषस्पाहि " ॥ ८ ॥ इत्यष्टभिर्मन्त्रैः प्रतिमन्त्रं दर्भैः शिरसि जलं प्रक्षिप्य, सूर्याभिमुखो मौनी निमज्ज्यो-न्मज्ज्याऽऽचामेत् ।

अथ दर्भमार्जनम् ।

ततो वक्ष्यमाणैरोङ्कारादिभिर्मन्त्रैः प्रतिमन्त्रं कुशत्रयेण सजलेन नाभिदक्षिणपार्श्वमारभ्य शिरोपरि नीत्वा नाभि-वामपार्श्वपर्यन्तं प्रदक्षिणमात्मानं पावयेत् ।

तत्रक्रमः—ॐ कारस्यपर ब्रह्मर्षिः परमात्मा देवता गायत्री छन्दः पावने विनियोगः । सप्तव्याहृतीनां विश्वामित्रजमदग्नि भरद्वाजगोतमात्रि वसिष्ठ कश्यपा ऋषयः अग्निवायुसूर्यबृहस्पतिवरुणेन्द्र विश्वेदेवा देवता गायत्र्युष्णिगनुष्टुब्जगतीत्रिष्टुप् पंक्तिबृहती छन्दांसि पावने विनियोगः ।

" ॐ पुनातु । ॐ भूः पुनातु । ॐ भुवः पुनातु । ॐ स्वः पुनातु । ॐ महः पुनातु । ॐ जनः पुनातु । ॐ तपः पुनातु । ॐ सत्यं पुनातु "

तत्सवितुरित्यस्य विश्वामित्र ऋषिः सविता देवता गायत्रीच्छन्दः पावने विनियोगः । " ॐ तत्सवितुर्वरेण्यम्भर्गो देवस्यधीमहि । धियोयोनः प्रचोदयात् ।" ॐ सर्व पुनातु । आपोहिष्ठेति तिसृणां सिन्धुद्वीप ऋषिरापो देवता गायत्री च्छन्दः पावने विनियोगः ।

इदमापरित्यस्य प्रजापतिर्ऋषिरापो देवता महापंक्तिश्छन्दः। हविष्मतीरित्यस्य प्रजापतिर्ऋषिर्लिङ्गोक्तादेवता अनुष्टुप्छन्दः। देवीराप इत्यस्य प्रजापतिर्ऋषिरापो देवता पंक्तिच्छन्दः। कार्षिरसीत्यादि त्रयाणां मंत्राणां प्रजापतिर्ऋषिः कार्षिरसीत्यक्षरचतुष्टयस्याज्यं देवता, समुद्रस्य समाप इत्यस्य चापो देवता त्रयाणामनुष्टुप् छन्दः पावने विनियोगः।

आपो देवता इत्यस्यवरुणऋषिरापो देवता त्रिष्टुप्छन्दः द्रुपदादिवेति मंत्रस्य प्रजापत्यश्विसरस्वत्य ऋषय आपो देवता अनुष्टुप् छन्दः। शन्नोदेवीति मंत्रस्य सिन्धुद्वीपऋषिर्गायत्री छन्दः। अपाᳬं रसमिति मंत्रस्य बृहस्पतिर्ऋषिः रसो देवता अनुष्टुप् छन्दः पावने विनियोगः।

अपोदेवीरित्यस्थ सिन्धुद्वीपऋषिरापो देवतान्यङ्कुसारिणी बृहतीच्छन्दः पावने विनियोगः।

पुनन्तु मा इति मंत्रयोः प्रजापतिर्ऋषिः पितरो देवता अनुष्टुप्छन्दः पावने विनियोगः। अग्न आयू ᳪषीत्यस्यवैश्वानर ऋषिरग्निर्देवता अनुष्टुप् छन्दः। पुनन्तु मेत्यस्य प्रजापतिर्ऋषिर्लिङ्गोक्ता देवता अनुष्टुप्छन्दः। पवित्रेणपुनीहिमेति मंत्रस्य प्रजापतिर्ऋषिरग्निर्देवता गायत्रीछन्दः। यत्ते पवित्र इत्यस्य प्रजापतिर्ऋषिरग्निर्देवता तृतीयपादस्य ब्रह्मादेवता गायत्रीच्छन्दः पावने विनियोगः।

पवमान इत्यस्य प्रजापतिर्ऋषिः सोमो देवता गायत्रीच्छन्दः। उभाभ्यां देवेति मंत्रस्य प्रजापतिर्ऋषिः सविता देवता गायत्रीच्छन्दः। वैश्वदेवीति मंत्रस्थ प्रजापतिर्ऋषिर्विश्वेदेवा देवतास्त्रिष्टुप्छन्दः पावने विनियोगः। चित्पतिर्मेतित्रयाणां प्रजापतिर्ऋषिश्चित्पतिर्मा वाक्पतिर्मेत्युभयोः प्रजापतिर्देवता देवोमेत्यस्य सविता देवता यजुच्छन्दः पावने विनियोगः।

तत्रमंत्राः—'ॐ आपो हिष्ठा मयोभुवस्तानऽऊर्ज्जे दधातन। महे रणाय चक्षसे॥ १॥ ॐ पुनातु। ॐ यो वः शिवतमो रसस्तस्य

भाजयतेह नः । उशतीरिव मातरः ॥ २ ॥ ॐ पुनातु । ॐ तस्माऽअरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ ॐ पुनातु ॥ ३ ॥ ॐ इदमापः प्रवहतावद्यञ्च मलञ्च यत् । यच्चाभिदुद्रोहानृतं यच्च शेपेऽअभीरुणम् । आपो मातस्मादेनसः पवमानश्च मुञ्चतु ॥ ॐ पुनातु ॥ ४ ॥ ॐ हविष्मतीरिमाऽआपो हविष्मां २ ॥ आविवासति । हविष्मान्देवोऽअध्वरो हविष्मां २ ॥ ऽअस्तुसूर्यः ॥ ॐ पुनातु ॥ ५ ॥ ॐ देवीरापोऽअपान्नपाद्योवऽऊर्म्मिर्हविष्यऽइन्द्रियावान्मदिन्तमः । तं देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषाम्भागस्थ स्वाहा ॥ ॐ पुनातु ॥ ६ ॥ ॐ कार्षिरसि समुद्रस्यत्त्वाक्षित्याऽउन्नयामि । समापोऽअद्भिरग्मत समोषधीभिरोषधीः ॥ ॐ पुनातु ॥ ७ ॥ ॐ अपोदेवामधुमतीरगृभ्णन्नूर्जस्वतीराजस्वश्चितानाः । याभिर्मित्रावरुणावभ्याषिञ्चन्न्याभिरिन्द्रमनयन्नत्त्यरातीः ॥ ॐ पुनातु ॥ ८ ॥ ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातोमलादिव । पूतम्पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥ ॐ पुनातु ॥ ९ ॥ ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः ॥ ॐ पुनातु ॥ १० ॥ ॐ अपा ꣡ रसमुद्वयसꣳ सूर्य्येसन्तꣳ समाहितम् । अपा ꣡ रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतोसीन्द्राय त्वा जुष्टङ्गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥ ॐ पुनातु ॥ ११ ॥ ॐ अपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः । तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥ ॐ पुनातु ॥ १२ ॥ ॐ पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः । पवित्रेण शतायुषा ॥ ॐ पुनातु ॥ १३ ॥

ॐ पुनन्तु मा पितामहाऽपुनन्तु प्रपितामहाः । पवित्रेण शतायुषा विश्वमायुर्व्यश्णवै ॥ ॐ पुनातु ॥ १४ ॥ ॐ अग्नऽआयूᳬंषि पवसऽआसुवोर्ज्जमिषञ्चनः । आरे बाधस्व दुच्छुनाम् ॥ ॐ पुनातु ॥ १५ ॥ ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वाभूतानि जातवेदःपुनीहिमा ॥ ॐ पुनातु ॥ १६ ॥ ॐ पवित्रेणपुनीहि मा शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतूँ २ ॥ रनु ॥ ॐ पुनातु ॥ १७ ॥ ॐ यत्ते पवित्रमर्च्चिष्यग्ने विततमन्तरा । ब्रह्म तेन पुनातु मा ॥ ॐ पुनातु ॥१८॥ ॐ पवमानः सोऽअद्यनः पवित्रेण विचर्षणिः । यः पोतास पुनातु मा ॥ ॐ पुनातु ॥ १९ ॥ ॐ उभाभ्यां देव सवितः पवित्रेण सवेन च ॥ मां पुनीहि विश्वतः ॥ ॐ पुनातु ॥ २० ॥ ॐ वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः । तया मदन्तः सधमादेषु वय ᳬं स्याम पतयो रयीणाम् ॥ ॐ पुनातु ॥ २१ ॥ **इति मन्त्रैर्दर्भैर्मार्जयित्वोदकं स्पृशेत् ।**

ततो नाभेरूर्ध्वंमार्जयेत्–"ॐ चित्पतिर्म्मा पुनातु देवो मासविता पुनात्वच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः । तस्यते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम् ।" ॐ पुनातु ॥ २२ ॥

पुनर्नाभेरधो मार्जयेत्–"ॐ वाक्पतिर्म्मा पुनात्वच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः । तस्यते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम् ।" ॐ पुनातु ॥ २३ ॥

पुनः सर्वाङ्गं मार्जयेत्—" ॐ देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः । तस्यते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम् " । ॐ पुनातु ॥ २४ ॥ इति सर्वाङ्गं कुशैर्मार्जयित्वोत्तरस्यां दिशितान् कुशांस्त्यजेत् ।

अथापामार्गमार्जनम् ।

ततोऽपामार्गेणात्मानं त्रिर्मार्जयन्—अपाघमिति मंत्रस्य शुनःशेप ऋषिर्लिङ्गोक्ता देवता अनुष्टुप् छन्दः अपामार्गमार्जने विनियोगः । " ॐ अपाघमपकिल्विषमप कृत्यामपोरपः । अपामार्गत्वमस्मदपदुःस्वप्न्यर्ठं सुवः " ॐ पुनातु । इति पठित्वा तमपि त्यजेत् ।

अथ दूर्वया मार्जनम् ।

ततो दूर्वयाऽऽत्मानं त्रिर्मार्जयन्—काण्डात्काण्डादिति मंत्रस्याग्निर्ऋषिर्दूर्वेष्टका देवताऽनुष्टुप्छन्दो दूर्वयामार्जने विनियोगः । "ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि । एवानो दूर्वे प्रतनु सहस्रेण शतेन च " । ॐ पुनातु । इति पठित्वा दूर्वामपि परित्यजेत् ।

ततोऽञ्जलिना जलमादाय शिरसि जलं निक्षिपन् पुनरिमान्मन्त्रान्पठेत्—" ॐ इमम्मे व्वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥ १ ॥ ॐ तत्त्वायामि ब्रह्मणा व्वन्देमानस्तदा शास्ते यजमानो हविर्भिः । अहेडमानो व्वरुणेह बोद्ध्युरुशर्ठं समानऽआयुः प्रमोषीः । ॐ पुनातु ॥ २ ॥ ॐ त्वन्नोऽअग्ने व्वरुणस्य व्विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः । यजिष्ठो व्वह्नितमः शोशुचानो व्विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् ॥ ॐ पुनातु ॥ ३ ॥ ॐ स त्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽ

अस्याऽउषसो व्युष्टौ। अवयक्ष्व नो व्वरुण ठं रराणो व्वीहि मृडीक ठं सुहवो नऽएधि ॥ ॐ पुनातु ॥ ४ ॥ ॐ मापो मौषधीर्हिठं सीर्द्धाम्नो धाम्नो राजँस्ततो व्वरुण नो मुञ्च ॥ ॐ पुनातु ॥ ५ ॥ ॐ उदुत्तमं व्वरुण पाशमस्मदवाधमं व्विमध्यमठं श्रथाय। अथा वयमादित्य व्व्रतेत-वानागसोऽअदितये स्याम ॥ ॐ पुनातु ॥ ६ ॥ ॐ मुञ्चन्तु मा शपथ्याद्थो व्वरुण्यादुत। अथो यमस्य पड्वीशात्सर्वस्मादेवकिल्विषात् ॥ ॐ पुनातु ॥ ७ ॐ अवभृथ निचुम्पुणनिचेरुरसिनिचुम्पुणः। अवदेवैर्देवकृतमेनो यासिषमवमर्त्यैर्मर्त्यकृतम्पुरुराव्णोदेवरिषस्पाहि ॥ ॐ पुनातु ॥ ८ ॥ इति

अथाऽघमर्षणम्।

ततोऽन्तर्जले निमग्नः सन् ऋतं च' इति सूक्तस्य त्रिर्जपेनाघमर्षणं कुर्यात्—अघमर्षणसूक्तस्याघमर्षण ऋषिरनुष्टुप्छन्दो भावभृतो देवताऽघमर्षणे विनियोगः "ॐ ऋतं च सत्यं चाऽभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत ततः समुद्रो अर्णवः ॥ समुद्रादर्णवादधिसम्वत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥ सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथोस्वः ॥"

अथ तीर्थ प्रार्थना।

ततस्तीर्थाभिमुखः साञ्जलिः प्रार्थयेत्—" ॐ विष्णोः पादप्रसूतासि वैष्णवी विष्णु पूजिता। पाहिनस्त्वेनसस्तस्मादाजन्ममरणान्तकात् ॥ १ ॥ विष्णोः पादार्घसम्भूते गङ्गे त्रिपथगामिनि। धर्मद्रवीति विख्याते पापं मे हर जाह्नवि ॥ २ ॥ तिस्रकोट्योऽर्ध कोटी च तीर्थानां वायुरब्रवीत्। दिवि भुव्यन्तरिक्षे च तानि ते सन्ति जाह्नवि ॥ ३ ॥नन्दिनी-

त्येव ते नाम देवेषु नलिनीति च । वृन्दा पृथ्वी च सुभगा विश्वकाया शिवासिता ॥ ४ ॥ विद्याधरी सुप्रसन्ना तथा लोक प्रसाधनी । क्षेम्या च जाह्नवी चैव शान्ता शान्ति प्रदायिनी ॥ ५ ॥ एतानि पुण्यनामानि स्नानकाले प्रकीर्तयेत् । भवेत्सन्निहिता तस्य गङ्गात्रिपथगामिनी ॥ ६ ॥ नमामि गङ्गे तव पादपङ्कजं सुरासुरैर्वन्दितदिव्यरूपम् । भुक्तिं च मुक्तिं च ददासि नित्यं भवानुसारेण सदा नराणाम् ॥ ७ ॥ या गतिर्योगयुक्तानां मुनीनामूर्ध्व रेतसाम् । सा गतिः सर्वजन्तूनां जाह्नवीतीर वासिनाम् ।" ॥ ८ ॥ इति पठित्वा नाभिमात्रजलं प्रविश्य स्नायात्स्नानाङ्गतर्पणंच कुर्यात् ।

अथ स्नानांनाङ्गतर्पणम् ।

ततः पूर्वाभिमुखः सन्कुशत्रयं गृहीत्वा सव्येन देवतीर्थेनोङ्कारपूर्वकं देवेभ्यः साक्षतमेकैकमञ्जलिं जले क्षिपेत् । तद्यथा—' ॐ मोदस्तृप्यताम् ' । १ ' ॐ प्रमोदस्तृप्यताम् ' । १ ' ॐ सुमुखस्तृप्यताम् ' । १ ' ॐ दुर्मुखस्तृप्यताम् ' । १ ' ॐ अविघ्नस्तृप्यप्यताम् ' । १ ' ॐ विघ्नकर्ता तृप्यताम् ' । १ ' ॐ ब्रह्मादयो देवास्तृ-

---

१ अत्रार्थे विष्णुः—स्नातश्चार्द्रवासादेवर्षिपितृतर्पणमम्भःस्थ एव कुर्वीत । पराशरः—" नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते । तर्पणं तु भवेत्तस्य तदङ्गत्वेन कीर्तितम् ॥ बाहुपूर्णांतिलैः कृत्वा जलस्थस्तर्पयेत्पितॄन् । स्थलस्थेन न कर्तव्यं पितॄणां तृप्तिमिच्छता ॥"

२ " ब्रह्माद्यानुपवीतीतु देवतीर्थेन तर्पयेत् । निवीती कायतीर्थेन मनुष्यान् सनकादिकान् ॥ "

तीर्थान्याह याज्ञवल्क्यः—' कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रंकरस्य च । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् '' ॥

देशिनी—तर्जनी । एतदुक्तं भवति—कनिष्ठांगुलिमूले प्रजापति तीर्थम् । तर्जनीमूले पितृतीर्थम् । अंगुष्ठमूले ब्रह्मतीर्थम् । अगुङ्लीनामग्रे च देवतीर्थमिति ।

प्यन्ताम् ' । १ ' ॐ भूर्देवास्तृप्यन्ताम् ' । १ ' ॐ भुवर्देवास्तृप्यन्ताम्' । १ ' ॐ स्वर्देवास्तृप्यन्ताम् ' । १ ' ॐ भूर्भुवः स्वर्देवास्तृप्यन्ताम् ' । १ ' ॐ गोतमादय ऋषयस्तृप्यन्ताम् ' १ ।

अथोदङ्मुखो निवीत्यूर्ध्वज्ञुषः (कण्ठीकृत्वा) प्राजापत्येन तीर्थेन सयवेन जलेन सनकादीन् द्विस्तर्पयेत्–' ॐ सनकादयो मनुष्यास्तृप्यन्ताम् ' ॥ २ ॥ ' ॐ भूर्ऋषयस्तृप्यन्ताम् ' २ ' ॐ भुवर्ऋषयस्तृप्यन्ताम् ' । २ ' ॐ स्वर्ऋषयस्तृप्यन्ताम् ' २ ' ॐ भूर्भुवः स्वर्ऋषयस्तृप्यन्ताम् ' । २

ततोऽपसव्यं दक्षिणाभिमुखः पितृतीर्थेन कृष्णतिलोदकैः कव्यवाडनलादींस्त्रिस्तर्पयेत्–' ' ॐ कव्यवाडनलादयो देवपितरस्तृप्यन्ताम् ' ३ ' ॐ भूः पितरस्तृप्यन्ताम् ' । ३ ॐ भुवः पितरस्तृप्यन्ताम् ' । ३ ' ॐ स्वः पितरस्तृप्यन्ताम् ' । ३ ' ॐ भूर्भुवः स्वः पितरस्तृप्यन्ताम् ' । ३

अथ मृतपितृक कर्तृकं तर्पणम् ।

ततोऽपसव्यं दक्षिणाभिमुखः पितृतीर्थेन कृष्णतिलोदकैस्त्रिस्तर्पयेत्–' ॐ अद्यामुकगोत्रा अस्मत्पितृ पितामह प्रपितामहा अमुकामुकनामानः सपत्नीकास्तृप्यन्ताम् ' । ३ । ' ॐ अद्यामुकगोत्रा अस्मन्मातामह प्रमातामह वृद्धप्रमातामहा अमुकामुक नामानः सपत्नीकास्तृप्यन्ताम् ' । ३ ।

ततःसव्येन–' ॐ आब्रह्मस्तम्बपर्यन्तं जगत्तृप्यन्ताम् ' ३ । **इति-जलाञ्जलिं दद्यात्** ।

ततोऽपसव्येन कृष्णतिलैर्यक्ष्मणे जलं दद्यात्–" ॐ यन्मया दूषितं तोयं मलैः शारीर सम्भवैः । तस्य पापस्य शुद्धयर्थं यक्ष्मै तत्ते तिलोदकम् ।" **इति मंत्रेण तिलमिश्रं जलाञ्जलिं दद्यात् ।**

ततो जलाद्बहिरागत्यतीरे—"ॐ अग्निदग्धाश्च ये जीवा येऽप्य-दग्धाः कुले मम । भूमौ दत्तेन तृप्यन्तु तृप्तायान्तु परागतिम् ।" इति जलाञ्जलिं निक्षिप्य, स्वदक्षिणभागे शिखोदकं निष्पीडयन्—

"ॐ लतागुल्मेषु वृक्षेषु पितरो ये व्यवस्थिताः । ते सर्वेतृप्तिमायान्तु मयोत्सृष्टैः शिखोदकैः" । इति पठेत् ।

ततःसव्यं कृत्वा'परिधास्यै' इति मन्त्रंपठन् अहतं वासः—"ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि शतं च जीवामि शरदः पुरूचारायस्पोषमभिसंव्ययिष्ये" इति मन्त्रेण परिधायोपवस्त्रं सव्ये स्कन्धे कृत्वाऽऽचम्य मध्याह्नसन्ध्यां कुर्यात ।

अथ मध्याह्न सन्ध्या ।

ततस्तत्रैव दर्भासनादौ प्राङ्मुख उदङ्मुखोवोपविश्य भस्मना चन्दनेन वा यथाधिकारं भाल त्रिपुण्ड्रमुर्ध्वपुण्ड्रं वा तिलकं विधाय कुशपवित्रपाणिः संयतचित्तः सप्रणव-

---

१ याज्ञवल्क्यः—"अष्टहस्तं नवं श्वेतं सदशं नाऽन्यधारितम् । अहतं तद्वि-जानीयात्सर्वकर्मसु पावनम्"।

२ विष्णुपुराणे—"होमदेवार्चनाद्यासु क्रियासु पठने तथा । नैकवस्त्रः प्रवर्तेत द्विजो नाचमने जपे" ।

व्याघ्रपादः -"नैकवस्त्रो द्विजः कुर्याद् भोजनंच सुरार्चनम्" । जीवत्पितृ-केनोत्तरीयं वस्त्रं न धार्यम् । उक्तं च ब्रह्माण्डपुराणे—"उत्तरीयं योगपट्टं तर्जन्यां रजतं तथा । न जीवत्पितृकैर्धार्यं ज्येष्ठो वा विद्यते यदि" । इति वचनात् ।

३ कात्यायनः—"श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने । धृत त्रिपुण्ड्ः पूतात्मा मृत्युंजयति मानवः"। "धार्यं भस्म त्रिपुण्ड्रं तु गृहिणां जलसंयुतम् । सर्वकालं भवेत्स्त्रीणां यतीनां जलवर्जितम् ॥ वानप्रस्थस्य--

गायत्र्या शिखां बद्ध्वा ऐशान्यभिमुख आचम्य "ॐ ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत । ततो रात्र्यजायत ततः समुद्रोअर्णवः । समुद्रादर्णवादधिसम्वत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत् । दिवं च पृथिवीं चान्तरिक्षमथोस्वः । **इति मंत्रेण पुनराचामेत् ।**

ततो दर्भैर्जलेनात्मानं सम्प्रोक्षयन्—" ॐ अपवित्रः पवित्रो वेत्यस्य वामदेव ऋषिः विष्णुर्देवता गायत्रीच्छन्दः । हृदिपवित्रकरणे विनियोगः **इति ऋष्यादिकं स्मृत्वा**—" ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा । यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः " । **इति पठेत् ।** " ॐ पृथिवीत्यस्य मेरुपृष्ठ ऋषिः । कूर्मो देवता सुतलं छन्दः । आसने विनियोगः । " ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम् " । **इति भूमिं प्रार्थयेत्**

अथ सङ्कल्पः ।

ततः स्वदक्षिणहस्ते जलाक्षत द्रव्यञ्चादाय--" **हरिः ॐ** तत्सदद्यैतस्य श्रीमद्भगवतो महापुरुषस्यविष्णोराज्ञया प्रवर्त्तमानस्य ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे सप्तमे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे कलिप्रथमचरणे, जम्बूद्वीपे, भरतखण्डे तत्रापि परमपवित्रे भारते वर्षे, आर्यावर्तान्तर्गत ब्रह्मावर्त्तैकदेशे, कुमारिकानाम क्षेत्रे, श्रीगङ्गायमुनयोर्म-

---

—कन्यानां दीक्षाहनि नृणां तथा । मध्याह्नात्प्रागजलैर्युक्तं परतो जलवर्जितम् ॥ मध्याङ्गुलित्रयेणैव स्वदक्षिणकरस्य च । त्रिपुण्ड्रं धारयेद्विद्वान् सर्वकिल्विषनाशनम् " इति प्रयोगपारिजाते " प्रातः ससलिलं भस्म मध्याह्ने गन्धमिश्रितम् । सायाह्ने निर्जलं भस्म एवं भस्म विलेपयेत् " ॥

४ प्रयोगपारिजाते—" ललाटे तिलकं कृत्वा सन्ध्याकर्मसमाचरेत् । अकृत्वा भालतिलकं तस्य कर्म निरर्थकम् " ॥

हानद्योरमुकदिग्भागे (**दक्षिणे भागे**) नर्मदाया उत्तरे भागे, श्रीबौद्धा-वतारे अमुक देशे, (**मरुदेशे**) अमुक नगरे, (श्रीबीकानेरमण्डलान्तर्गत रतनगढ नाम्नि नगरे) श्री चान्द्रसंज्ञकानां प्रभवादिषष्टिसम्वत्सराणां मध्ये अमुकनाम्नि सम्वत्सरे, श्रीमन्नपति विक्रमार्कादमुकसंख्याके सम्वत्सरे, अमुकायने, (**दक्षिणायने**) अमुकमासे, अमुकपक्षे, अमुकतिथौ, अमुकवासरे, अमुकगोत्रोत्पन्नोऽमुकशर्माहं (**वर्मा गुप्तोऽहं वा**) "श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं ममोपात्तदुरितक्षयद्वारा रुद्रलोकावाप्त्यै श्रीपरमेश्वरप्रीत्यर्थं मध्याह्न सन्ध्योपासनकर्म करिष्ये"। **इति सङ्कल्प्य सप्रणवगायत्र्या वारिणात्मानं वेष्टयित्वा रक्षां कुर्यात् ।**

ततः—ॐ कारस्य ब्रह्मर्षिर्गायत्रीच्छन्दः परमात्मा देवता, सप्तव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुब्बृहती पंक्तित्रिष्टुब्जगत्यश्छन्दांस्यग्निवायु सूर्यबृहस्पति वरुणेन्द्रविश्वेदेवा देवताः, तत्सवितुरिति विश्वामित्र[1] ऋषि गायत्री छन्दः सविता देवता, आपोज्योतिरिति शिरसः प्रजापतिर्ऋषिर्यजुश्छन्दो ब्रह्माग्निवायुसूर्या देवताः प्राणायामे विनियोगः । **इति ऋष्यादिकं स्मृत्वा सप्तव्याहृतिकां[2] सप्रणवां सशिरसं गायत्रीं पूरक[3] कुम्भक रेचकक्रमेण त्रिः पठेत ।**

अथ प्राणायाम मन्त्रः ।

"ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तप ॐ सत्यम् ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि । धियो यो नः प्रचो

---

१ 'विश्वस्य जगतो मित्रं विश्वामित्रः प्रजापतिः'।

२ मनुः—"सव्याहृतिं सप्रणवां गायत्री शिरसा सह । त्रिः पठेदायतः प्राण प्राणायामः स उच्यते"॥

३ बाह्यवायोरन्त प्रवेशनं पूरकः । प्रवेशितस्य धारणं कुम्भकः । धृतस्य बहिर्निस्सारणं रेचकः ।

योगि याज्ञवल्क्यः—"शनैर्नासापुटाद्वायुमुत्सृजेन्नतुवेगतः" इति ।

दद्यात् । ॐ आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् "। इति मन्त्रान्नवधाऽऽवृत्य मनसा पठेत् ।

ॐ आपः पुनन्त्विति मंत्रस्य विष्णुर्ऋषिरनुष्टुप्छन्द आपो देवता अपामुपस्पर्शने विनियोगः । " ॐ आपः पुनन्तु पृथिवीं पृथ्वी पूता पुनातु माम् । पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम् । यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम । सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रह ँ स्वाहा " । इति मन्त्रेण सकृदाचामेत् ।

(तत्र आपोहिष्ठेत्यादित्र्यृचस्य सप्तभिः पदैः शिरसि, अष्टमेन भूमौ, नवमेनापि शिरसि कुशत्रयेण जलं क्षिपेत्)-
ॐ आपोहिष्ठेत्यादि त्र्यृचस्य सिन्धुद्वीप ऋषिर्गायत्री छन्द आपो देवता मार्जने विनियोगः । " ॐ आपो हिष्ठामयोभुव ÷ ॐ तानऽऊर्ज्जेदधातन । ॐ महेरणाय चक्षसे । ॐ योवः शिवतमो रसः ÷ । ॐ तस्य भाजयते-हनः ÷ । ॐ उशतीरिवमातरः ÷ । ॐ तस्माऽअरङ्गमामवो ÷ । यस्यक्षयाय जिन्वथ । इति भूमौ । ॐ आपोजनयथाचनः । इति मन्त्रैः कुशैर्मार्जयेत् ।

ततः करेण जलं वामहस्ते गृहीत्वा तं न्युब्जेन दक्षिण-हस्तेनाच्छाद्य वारत्रयं द्रुपदां पठित्वा तज्जलं शिरसि क्षिपेत्-ॐ द्रुपदादिवेति मंत्रस्य कोकिलो राजपुत्र ऋषिरनुष्टुप्छन्दः आपो देवता सौत्रामण्यवभृथे (अघमर्षणे) विनियोगः । " ॐ द्रुपदा

---

१ व्यासः-" विप्रुपोऽष्टौ क्षिपेदूर्ध्वमधो यस्य क्षयाय जित " ।
तथा च स्मृतौ-" आपोहिष्ठेत्यृचैः कुर्यान्मार्जनन्तु कुशोदकैः । प्रणवेन तु संयुक्तं क्षिपेद्वारि पदे पदे " ।

दिव मुमुचानऽ स्विन्नऽ स्नातो मलादिव । पूतम्पवित्रेणेवाज्यमापं शुन्धन्तु मैनसऽ ॥ ततः करस्थ जलं नासायां संयोज्य आयतासुर[1]नायतासुर्वा त्रिः सकृद्वाऽघमर्षणं जपित्वा तज्जलमपश्य[2]न्स्ववाम भागे भूमौ निक्षिपेत्—ॐ ऋतं च सत्यं चेत्यघमर्षण सूक्तस्याघमर्षण ऋषिरनुष्टुप्छन्दो भाववृत्तो देवताऽश्वमेधावभृथे विनियोगः।

"ॐ ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत । ततो रात्र्यजायत ततः समुद्रोऽअर्णवः । समुद्रादर्णवादधि सँव्वत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवञ्च पृथिवीञ्चान्तरिक्षमथोस्वः" ।

ततः—ॐ अन्तश्चरसीति मंत्रस्य तिरश्चीन ऋषिरनुष्टुप्छन्दः आपो देवता आचमने विनियोगः ।

"ॐ अन्तश्चरसि भूतेषु गुहायां विश्वतो मुखः । त्वं यज्ञस्त्वं व षट्कार आपोज्योतीरसोऽमृतम्" । इत्याचामेत् ।

अथ सूर्यायार्घ्यदानम् ।

तत उत्थाय[3] गन्धाक्षतपुष्पयुतमेकं[4]जलाञ्जलिं सूर्याभिमुखं प्रणमन्निक्षिपेत्—ॐ भूर्भुवस्वरिति महाव्याहृतीनां परमेष्ठी प्रजापतिर्ऋषिरग्निर्वायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दांसि । ॐ तत्स-

---

१ आयतासुः—संयतप्राणः ।

२ शौनकः—"दक्ष नासा पुटेनैव पाप्मानमपसारयेत् । —तज्जलं नावलोक्याथ वामभागे क्षितौ क्षिपेत्"

३ कात्यायनः—"उत्थायार्कं प्रतिक्षिपेत् त्रिकेणाञ्जलिमम्भसः"। प्रणवः, व्याहृतयः, सावित्रीति त्रिकम् ।

४ व्यासः—"कराभ्यां तोयमादाय गायत्र्या चाभिमन्त्रितम् । आदित्याभि-

वितुरिति मंत्रस्य विश्वामित्र ऋषिः सविता देवता गायत्री छन्दोऽर्घ्यदाने विनियोगः।

तत्रमंत्रः—" ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियो योनः प्रचोदयात् "।

तत ऊर्ध्वबाहुः सूर्यमुदीक्षमाणो वक्ष्यमाणैर्मन्त्रैः सूर्योपस्थानं कुर्यात। उद्वयन्तमिति मन्त्रस्य हिरण्यस्तूप ऋषिरनुष्टुपछन्दः सूर्योदेवता, उदुत्यमिति मन्त्रस्य प्रस्कण्व ऋषिर्गायत्रीच्छन्दः सूर्योदेवता, चित्रन्देवानामिति मन्त्रस्य कौत्स ऋषिस्त्रिष्टुप्छन्दः सूर्योदेवता, तच्चक्षुरिति मन्त्रस्य दध्यङ्ङाथर्वण ऋषिरक्षरातीत पुर उष्णिक् छन्दः सूर्यो देवता सर्वेषां सूर्योपस्थाने विनियोगः।

" ॐ उद्वयन्तमसस्परिस्व ÷ पश्यन्त ऽउत्तरम्। देवन्देवत्रासूर्य्यमगन्मज्ज्योतिरुत्तमम् " ॥ १ ॥ ॐ उदुत्यञ्जातवेदसन्देवंव्वहन्ति केतवं ÷।

——मुखस्तिष्ठंस्त्रिः क्षिपेत् सन्ध्ययोर्द्वयोः ॥ सकृदेवतु मध्याह्ने क्षेपणीयं द्विजातिभिः "।

तैत्तिरीय सन्ध्याभाष्ये—" मध्याह्ने तु सकृच्चैव क्षेपणीयं द्विजातिभिः "।

शौनकोऽपि—"मध्याह्ने सकृदेव स्यात् सन्ध्ययोस्तु त्रिवारतः। ईषन्नम्रः प्रभाते तु मध्याह्ने ऋजुसंस्थितः। अर्घ्यं प्रक्षेपणं कुर्यात् सायं तूप विशन् भुवि "।

१ गोभिल भाष्ये—" तदसंसक्तपार्ष्णिर्वा एक पादर्धपादपि। कुर्यात् कृताञ्जलिर्वापि मूर्ध्वबाहुरथापि वा "।

अन्यच्च—" हस्ताभ्यां स्वस्तिकं कृत्वा प्रातस्तिष्ठेद्दिवाकरम्। मध्याह्ने तु ऋजूबाहू सायं मुकुलितौ करौ " ॥

" जले त्वर्घ्यं प्रदातव्यं जलाभावे तु तत्स्थले। सम्प्रोक्ष्य वारिणा सम्यक् पश्चादर्घ्यं यथाविधि ॥ उपविश्य तु सायाह्ने जले त्वर्घ्यं न निक्षिपेत्। निक्षिपेद् यदि मूढात्मा रौरवं नरकं व्रजेत् "। इति तैत्तिरीयसन्ध्याभाष्ये।

दृशे विश्वाय सूर्य्यम् ॥ २ ॥ ॐ चित्रन्देवानामुदगादनीकञ्चक्षुर्मित्रस्य
वरुणस्याग्नेः आप्रा द्यावा पृथिवीऽअन्तरिक्ष ठँ सूर्यऽआत्माजगतस्तस्थु
षश्च ॥ ३ ॥ ॐ तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः
शतञ्जीवेम शरदः शत ठँ शृणुयाम शरदः शतम्प्रब्रवाम शरदः
शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात् " ॥४॥ इति ।

अथ षडङ्गन्यासः ।

ततः—' ॐ हृदयाय नमः ' । ' ॐ भूः शिरसे स्वाहा ' २ ' ॐ भुवः शिखायै वषट् ' ३ ' ॐ स्वः कवचाय हुम् ' ४ ' ॐ भूर्भुवः स्व नेत्राभ्यां वौषट् ' ५ ' ॐ भूर्भुवः स्वः अस्त्राय फट् ' ६ । **इत्यङ्गानि त्रिरावर्तयेत** ।

ततः—' ॐ कारस्य ब्रह्मा ऋषिर्गायत्री छन्दोऽग्निर्देवता जपे विनियोगः । ॐ त्रिव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्छन्दांस्यग्निवाय्वादित्या देवता जपे विनियोगः । ॐ गायत्र्या विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता जपे विनियोगः । **इति ऋष्यादिकं स्मृत्वा-ध्यायेत्** ।

अथ ध्यानम् ।

" ॐ मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वार्थवर्णात्मिकाम् । गायत्रीं वरदाभयांकुशकशां शूलं कपालं गुणं शंखं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे " । **इति गायत्रीं ध्यात्वाऽऽवाहयेत्** ।

ॐ तेजोसीतिदेवा ऋषयः शुक्रं दैवतं गायत्री छन्दो गायत्र्यावाहने विनियोगः ।

" ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि प्रियन्देवानामनाधृष्टन्देवयजनमसि "। इति गायत्रीमावाह्य–

ॐ तुरीयस्य विमल ऋषिः परमात्मा देवता गायत्री छन्दः गायत्र्युपस्थाने विनियोगः ।

" ॐ गायत्र्यस्येक पदी द्विपदी त्रिपदी चतुष्पद्यपदसि न हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदोम् "। इति सम्प्रार्थ्य यथाशक्ति गायत्रीं जपेत् ।

ततो जपान्ते देवागातिविति पठित्वा प्रदक्षिणीकृत्य सूर्योपस्थानं कुर्यात्

अथ सूर्योपस्थानम्[1] ।

ततो दक्षिणहस्तेसाक्षतजलमादाय देशकालौसङ्कीर्त्य–" ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं सूर्योपस्थानं करिष्ये "। इति सङ्कल्प्योत्थायोर्ध्वबाहुः सूर्यमुदीमाणः सूर्योपस्थानं कुर्यात ।

ॐ विभ्राडित्यस्य विभ्राट्सौर्य्य ऋषिः सूर्यो देवता त्रिष्टुप्छन्दः । उदुत्यमिति तिसृणां प्रस्कण्व ऋषिः सूर्यो देवता गायत्री छन्दः । तम्प्रत्नथेत्यस्य काश्यपवत्सावृषीः सोमो देवता त्रिष्टुप्छन्दः, अयंवेन इत्यस्य वेन ऋषिः सोमो देवता त्रिष्टुप्छन्दः, चित्रमित्यस्य कुत्साङ्गिरस ऋषिः सूर्यो देवता त्रिष्टुप्छन्दः, आनइत्यस्यागस्त्य ऋषिः सूर्यो देवता त्रिष्टुप्छन्दः, यद्द्येतस्य श्रुतकक्षसुतकक्षावृषी सूर्यो देवता त्रिष्टुप्छन्दः, तरणिरित्यस्य

---

१ कात्यायन परिशिष्टसूत्रे–" विभ्राडित्यनुवाकपुरुषसूक्त शिवसंकल्पमण्डल ब्राह्मणैरित्युपस्थाय, प्रदक्षिणीकृत्य नमस्कृत्य उपविशेद् दर्भेषु दर्भपाणिः, स्वाध्यायं च यथा शक्त्यादावारभ्य वेदम् "।

प्रस्कण्व ऋषिः सूर्यो देवता गायत्री छन्दः, तत्सूर्यस्येति द्वयोः कुत्सऋषिः सूर्योदेवता त्रिष्टुप्छन्दः,बण्महानिति द्वयोर्जमदग्निर्ऋषिःसूर्योदेवतात्रिष्टुप्छन्दः, श्रायन्त इवेत्यस्य नृमेधा ऋषिः सूर्यो देवता बृहतीच्छन्दः, अद्यादेवा इत्यस्य कुत्स ऋषिः सूर्यो देवता त्रिष्टुप्छन्दः, आकृष्णेनेत्यस्य हिरस्तूपांगिरसावृषी सूर्यो देवता त्रिष्टुप् छन्दः सूर्योपस्थाने विनियोगः ।

हरिः' ॐ विभ्राड्बृहत्पिबतु सोम्यम्मद्ध्वायुर्दधद्यज्ञपतावविह्रुतम् । वातजूतोयोऽअभिरक्षतित्त्मनाप्प्रजाः पुपोष पुरुधा विराजति ॥ १ ॥ उदुत्यञ्जातवेदसन्देवं व्वहन्ति केतवः । दृशे विश्वाय सूर्य्यम् ॥ २ ॥

---

१ भरद्वाज शिक्षायाम्—" प्रश्नानुवाकाद्यारम्भे सविसर्गोच्चको हरिः । न सन्धिः प्रणवे नित्यं विरामे स्वरितो भवेत् ।" स विसर्ग आद्युदात्तोऽन्त्य स्वरितो हरिशब्दः प्रयोज्यः । तस्य प्रणवेन सह सन्धिर्न कार्यः ।

२ अत्र मन्त्रादौ प्रणवोच्चारणमवश्यमेव विधेयम्—

उक्तं च दाल्भ्यपरिशिष्टे—" ब्रह्मयज्ञो जपो होमो देवर्षि पितृकर्म च । अनोङ्कृत्य कृतं सर्वं न भवेत्सिद्धिदायकम् । "

३ यज्ञादि कर्मसु हस्तस्वरहीनमन्त्रपाठकरणेऽपि दोषाभावउक्तः कात्यायनसूत्रे—" जपे होमे मखे श्राद्धेऽभिषेके पितृकर्मणि । हस्तस्वरं न कुर्वीत सन्ध्यादौ देवपूजने " ।

अन्यच्च—" उपस्थाने जपे होमे मार्जने यज्ञकर्मणि । कण्ठस्वरं प्रकुर्वीत हस्तस्वर विवर्जितम् " ।

तथा च रेणुः—"गृह्य कर्मणि ये मन्त्रा ज्ञेयाः स्वाध्याय पाठतः । कि मध्यमवृत्त्या ते न द्रुता न विलम्बिताः" ।

शौनकोऽपि—"स्वरवर्णलयोपेत मात्रास्थानक्रियान्वितम् । वेदमेवं पठेद्य स्वाध्यायफलमश्नुते" ।

तथा च कर्माङ्गत्वेन पठ्यमानानां मन्त्राणामनध्यायो नास्ति—"स्वाध्याये नध्यायो मन्त्राणां, न कर्मण्यर्थान्तरत्वात्" । (आप० १-४०) इति सूत्रात

येनापावक चक्षसाभुरण्यन्तञ्जनाँ २ऽअनु । त्वं व्वरुणपश्यसि ॥ ३ ॥
द्व्यावध्वर्षूऽआगतठूँरथेनसूर्यत्वचा मद्ध्वायज्ञठूँ समञ्जाथे। तम्प्रत्नथायँ
वेनश्चित्रन्देवानाम् ॥ ४ ॥ तम्प्रत्नथापूर्वथाव्विश्वथेमथाज्ज्येष्ठतातिम्बर्हिँ-
षदंᳬस्वर्व्विदम् । प्रतीचीनं व्वृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुवर्द्धसे
॥५॥अयँव्वेनश्चोदयत्पृश्निगर्भाज्ज्योतिर्जरायूरजसो व्विमाने। इममपाᳬसङ्गमे
सूर्य्यस्यशिशुन्नविप्रामतिभीरिहन्ति ॥६॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्मि त्र-
स्य व्वरुणस्याग्नेः । आप्राद्यावापृथिवीऽअन्तरिक्षठूँ सूर्यऽआत्माजगतस्त-
स्थुषश्च ॥ ७ ॥ आनऽइडाभिर्व्विदथेसुशस्तिव्विश्वानरः सवितादेवऽएतु ।
अपि यथायुवानो मत्सथानोव्विश्वञ्जगदभिपित्वेमनीषा ॥ ८ ॥ यदद्यकच्च-
त्रहन्नुदगाऽअभिसूर्य्य । सर्व्वन्तदिन्द्रतेव्वशे ॥ ९ ॥ तरणिर्व्विश्वदर्शतो-
ज्योतिष्कृदसिसूर्य्य । विश्वमाभासिरोचनम् ॥ १० ॥तत्सूर्यस्यदेवत्वन्तन्म-
हित्वम्मध्याकर्त्तोर्व्विततठूँ सञ्जभार । यदेदयुक्तहरितः सधस्थादाद्रात्री-
वासस्तनुतेसिमस्मै ॥ ११ ॥ तन्मित्रस्यव्वरुणस्याभि चक्षेसूर्य्योरूपङ्कृणुते
द्यौरुपस्थे। अनन्तमन्यद्रुशदस्यपाजः कृष्णमन्यद्धरितः सम्भरन्ति ॥१२॥
ण्महाँ२ऽअसिसूर्य्यबडादित्यमहाँ२ऽअसि। महस्तेसतो महिमापनस्यतेद्धा-
वमहाँ२ऽअसि ॥ १३ ॥ बट्सूर्यश्रवसामहाँ२ऽअसि सत्रादेव-
हाँ२ऽअसि । मह्नादेवानामसुर्य्यः पुरोहितो व्विभुज्योतिरदाभ्यम्
१४ ॥ श्रायन्तऽइव सूर्य्यं व्विश्वेदिन्द्रस्य भक्षत । वसूनिजा-
जनेमानऽओजसाप्रतिभागन्नदीधिम ॥ १५ ॥ अद्यादेवाऽउदितासूर्य्यस्य
रठूँ हसःपिपृतानिरवद्यात् । तन्नो मित्रो व्वरुणोमा महन्तामदितिः

सिन्धु ÷ पृथिवीऽउतद्यौः ॥ १६ ॥ आकृष्णेनरजसा व्वर्त्तमानोनिवेशय
मृतम्मर्त्यञ्च । हिरण्ययेन सविता रथेनादेवोयाति भुवनानि पश्यन् "॥१७

अथ पुरुषसूक्तम् ।

ॐ सहस्रशीर्षेति षोडशर्चस्य नारायणपुरुष ऋषिः आद्यानां पञ्चदशा
मनुष्टुप्छन्दः षोडशानां त्रिष्टुप्छन्दः पुरुषो देवता सूर्योपस्थाने विनियोग

" हरिः÷ॐ सहस्रशीर्षापुरुषःसहस्राक्षः सहस्रपात् । सभूमिठं स
र्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषऽएवेद ठं सर्व्वंय्यद्भूतंय्यच
भाव्यम् । उतामृतत्त्वस्येशानो यदन्नेनाति रोहति ॥ २ ॥ एतावानस्यम
मातोज्यायाँश्च पूरुषः । पादोस्य व्विश्वाभूतानि त्रिपादस्यामृतन्दिवि ॥ ३
त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्ये हाभवत्पुनः । ततो व्विष्वङ्व्यक्रामत्साशना
शनेऽअभि ॥ ४ ॥ ततो व्विराडजायतव्विराजोऽअधिपूरुषः । सजातो
अत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ ५ ॥ तस्माद्यज्ञात्सर्वहुतःसम्भृतम्पृषद
ज्यम् । पशूँस्ताँश्चक्रेवायव्व्यानारण्या ग्राम्याश्चये ॥ ६ ॥ तस्माद्यज्ञात्सर्व
ऽऋचःसामानिजज्ञिरे । छन्दाᳩसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७
तस्मादश्वाऽअजायन्तयेकेचोभयादतः । गावोहजज्ञिरेतस्मात्तस्माज्जाता
अज वयः ॥ ८ ॥ तंय्यज्ञम्बर्हिषिप्रौक्षन्पुरुषञ्जातमग्रतः । तेनदेवाऽअ
जन्तसाध्याऋषयश्चये ॥ ९ ॥ यत्पुरुषँ व्व्यदधुः कतिधाव्व्यकल्पयन्
मुखङ्किमस्यासीत्किम्बाहू किमूरूपादाऽउच्येते॥१० ब्राह्मणोस्यमुखमासीद्
राजन्यःकृतः । ऊरू तदस्ययद्वैश्यः पद्भ्याᳩशूद्रोऽअजायत॥११॥चन्द्र
मनसो जातश्चक्षोःसूर्य्योऽअजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजा

॥ १२ ॥ नाभ्याऽआसीदन्तरिक्षठं शीर्ष्णोद्यौ ÷ समवर्तत । पद्भ्याम्भू-
मिर्दिशः श्रोत्रात्तथालोकाँऽअकल्पयन् ॥ १३ ॥ यत्पुरुषेणहविषा देवा-
यज्ञमतन्वत । वसन्तोस्यासीदाज्यङ्ग्रीष्मऽइध्मःशरद्धविः ॥ १४ ॥ सप्ता-
स्यासन्परिधयस्त्रिःसप्तसमिधः कृताः । देवायद्यज्ञन्तन्वानाऽअबध्नन्पु-
रुषम्पशुम् ॥ १५ ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्माणि प्रथमान्यासन् ।
तेहनाकम्महिमानः सचन्त यत्र पूर्वेसाध्याः सन्ति देवाः" ॥ १६ ॥

अथ शिवसङ्कल्पः—

यज्जाग्रत इति षड् ऋचस्य शिवसङ्कल्प ऋषिर्मनो देवता त्रिष्टुप्छन्दः सूर्योपस्थाने विनियोगः। 'ॐ यज्जाग्रतोदूरमुदैतिदै-
वन्तदुसुप्तस्यतथैवैति । दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मेमनः ÷ शिवस-
ङ्कल्पमस्तु ॥ १ ॥ येनकर्माण्यपसोमनीषिणो यज्ञेकृण्वन्ति विदथेषु-
धीराः । यदपूर्वंय्यक्षमन्तः प्रजानान्तन्मे मनः ÷ शिवसङ्कल्पमस्तु
॥ २ ॥ यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु । यस्मान्नऽ
ऋतेकिञ्चनकर्मक्रियते तन्मेमनः ÷ शिवसंकल्पमस्तु ॥ ३ ॥ येनेदम्भूत-
म्भुवनम्भविष्यत्परिगृहीतममृतेन सर्वम् । येनयज्ञस्तायते सप्तहोतातन्मे
मनः ÷ शिवसङ्कल्पमस्तु ॥ ४ ॥ यस्मिन्नृचः सामयजूᳪषियस्मिन्प्रति-
ष्ठितारथनाभाविवाराः । यस्मिँश्चित्तठं सर्व्वमोतम्प्रजानान्तन्मे मनः ÷
शिवसङ्कल्पमस्तु ॥ ५ ॥ सुषारथिरश्वानिवयन्मनुष्यान्नेनीयतेभीशुभिर्व्वा-
जिनऽइव । हृत्प्रतिष्ठंय्यदजिरञ्जविष्ठन्तन्मेमनः ÷ शिवसङ्कल्पमस्तु ॥ ६ ॥

अथ मण्डल ब्राह्मणम् ।

यदेतदिति मण्डल ब्राह्मणस्य विवस्वानृषिर्वायुर्देवता सूर्योपस्थाने विनियोगः ।

" ॐ यदेतन्मण्डलंतपतितन्महदुक्थन्ताऽऋचहं सऽऋचाँल्लोकोऽथयदेतदर्चिर्दीप्यते तन्महाव्रतंतानिसामानिससाम्नाँल्लोकोऽथयऽएषऽएतस्मिन्मण्डले पुरुषऽ सोऽग्निस्तानियजूꣳषि स यजुषाँल्लोकऽ ॥ १ ॥ सैषात्रय्येव विद्यातपतितद्धैतदप्यविद्वाꣳसऽआहुस्त्रयीवाऽएषा विद्यातपतीतिव्वाग्घैवतत्पश्यन्तीव्वदति ॥ २ ॥ सऽएषऽएवऽमृत्युः । सऽएष एव मृत्युर्यऽएषऽएतस्मिन्मण्डलेपुरुषोथैतदमृतंयदेतदर्चिर्दीप्यते तस्मान्मृत्युर्नम्रियतेमृतेह्यन्तस्तस्मादुन दृश्यतेमृतेह्यन्तऽ ॥ ३ ॥ तदेषश्लोको भवति । तदेषश्लोकोभवत्यन्तरमृत्योरमृतमित्यवरꣳ ह्येतन्मृत्योरमृतंमृत्यावमृतमाहितमित्येतस्मिन्हि पुरुषऽएतन्मण्डलं प्रतिष्ठितं तपति मृत्युर्व्विवस्वन्तं वस्तऽइत्यसौवाऽआदित्योव्विवस्वानेषह्यहोरात्रेव्विवस्वतीत्येतस्मिन्हिमण्डलऽएतस्यपुरुषस्यात्मैतदेष श्लोको भवति ॥ ४ ॥ तयोर्वाऽएतयोरुभयोरेतस्यचार्चिषऽऽएतस्यचपुरुषस्यैतन्मण्डलं प्रतिष्ठातस्मान्महदुक्थम्परस्मैशꣳ सतितस्मादुक्थशसंभूयिष्ठंपरिचक्षते प्रतिष्ठाच्छिन्नोहिभवतीत्यधिदैवतम् " ।

अथाधियज्ञम् ।

" यदेतन्मण्डलंतपत्ययꣳ सरुक्मोथयदेतदर्चिर्दीप्यतऽइदं तत्पुष्करपर्णमापोह्येताऽआपहं पुष्करपर्णमथयऽएषऽएतस्मिन्मंडले पुरुषोयमेवसयोयꣳ हिरण्मयः पुरुषस्तदेतदेवैतत्त्रयꣳ संस्कृत्येहोपधत्तेतद्यज्ञस्यैवानुसꣳस्थामूर्द्धमु-

क्रामति तदेतमप्येति यऽएषतपति तस्मादग्निन्नाद्रियेत परिहन्तुमसुत्रह्येष-
तदा भवतीत्युऽएवा धियज्ञम् ॥ ६ ॥"

अथाऽध्यात्मम् ।

"यदेतन्मण्डलं तपति यच्चैषरुक्मऽइन्द्रुतच्छुक्लमक्षन्नथयदेतदर्चिर्दीप्यते
यच्चैतत्पुष्करपर्णमिदंतत्कृष्णमक्षन्नथयऽएषऽएतस्मिन्मण्डले पुरुषोयश्चैष
हिरण्मयः पुरुषोयमेवसयोयं दक्षिणेक्षन्पुरुषः ॥ ७ ॥ स एषऽएवलोकं-
पृणतामेषसर्व्वोग्निरभि संपद्यतेतस्यैते मिथुनं योयं सव्येक्षन् पुरुषो र्द्धमुहै-
तदात्मनोयन्मिथुनंयदावैसहमिथुनेनाथसर्वोथकृत्स्नःकृत्स्नतायै तद्यत्त द्वेभव
वतोद्वन्द्वंहिमिथुनं प्रजननन्तस्माद्द्वे द्वे लोकं पृणेऽउपधीयेतेतस्माद्द्वाभ्यां
द्वाभ्यां चितिं प्रणयन्ति ॥ ८ ॥ सऽएषऽएवेन्द्रोयोयंदक्षिणेक्षन् पुरुषोथेय-
मिन्द्राणीताभ्यांदेवाऽएतांविधृतिमकुर्वन्नासिकान्तस्माज्जायायाऽ अन्तेनाश्नी-
यावीर्यवान् हास्माज्जायतेऽवीर्यवन्तमुहसाजयनयतियस्याऽअन्तेनाश्नाति
॥ ९ ॥ तदेतद्देवव्रतꣳ राजन्यबन्धवोमनुष्याणां मनुतमां गोपायन्ति तस्मा-
दुतेषुवीर्यवाञ्जायतेमृतं वाकाशंव्वयसाꣳसाक्षिमश्येनं जनयति ॥ १० ॥
तौ हृदयस्याकाशं प्रत्यवेत्यमिथुनीभवतस्तौ यदामिथुनस्यान्तंगच्छतोथहै-
तत्पुरुषः स्वपितितद्यथाहैवेदंमानुषस्यमिथुनस्यान्तंगत्वासम्विदऽइवभवत्येव-
ꣳहैवैतदसंविदऽइवभवतिदैवꣳ ह्येतन्मिथुनपरमोह्येषऽआनन्दः ॥ ११ ॥
तस्मादेवंव्वित्स्वप्यात्लोक्यꣳ हैतऽएवतद्देवते मिथुनेनप्रियेण धाम्ना समर्द्धयति
तस्मादुहस्वपन्तंधुरेवनबोधयेन्नेदेतेदेवतेमिथुनीभवन्त्यौ हिनसानीतितस्मा-
दुहैतत्सुषुपुषः श्लेष्माणमिवमुखं भवत्येतेऽएवतद्देवतेरेतः सिञ्चतस्तस्माद्रेतसऽ-

इदꣳ सर्वꣳ सम्भवतियदिदंकिञ्च ॥ १२ ॥ सऽएषऽएवमृत्युर्यऽएषऽएत
स्मिन्मण्डलेपुरुषोयश्चायंदक्षिणेक्षन् पुरुषस्तस्यहैतस्यहृदयेपादावतिहतौ तौ
तदाच्छिद्योत्क्रामति सयदोत्क्रामत्यथहैतत्पुरुषोम्रियते तस्मादुहैतत्प्रेतमाहुरा
च्छेद्यस्येति ॥ १३ ॥ एषऽउऽएवप्राणऽएषाहीमाः सर्वाः प्रजाः प्रणयति
तस्यैतेप्राणाः स्वाः सयदास्वपित्यथैनमेतेप्राणाः स्वाऽअपियन्ति तत्स्वाप्यय
स्वाप्ययोहवैतꣳस्वप्नऽइत्याचक्षते परोक्षं परोक्षकामाहि देवाः ॥ १४ ॥
सऽएतैःसुप्तोन कस्यचनवेदनमनसा सङ्कल्पयति नवाचान्नस्य
रसंविजानातिन चक्षुषा पश्यतिन श्रोत्रेण शृणोत्येतꣳ
ह्येतेतदा पीताभवन्ति सऽएषऽएकः सन् प्रजासुबहुधाव्याविष्टस्तस्मादेकासतꣳ
लोकेपृणासर्वमग्निमनु विभवत्यथयदेकऽएवतस्मादेका ॥ १५ ॥ तदाहुरेको
मृत्युर्बहवऽइत्येकश्चबहवश्चेतिब्रूयाद्यदहासावमुत्रतेनैकोथयदिह प्रजासुबहुधा
व्याविष्ठस्तेनोबहवः ॥ १६ ॥ तदाहुरन्तिकेमृत्युर्दूराऽइत्यन्तिकेचदूरे-
चेतिहब्रूयाद्यदहायमिहाध्यात्मन्तेनान्तिकेऽथयदसावमुत्र तेनोदूरे ॥ १७ ॥
तदेषश्लोकोभवत्यन्नेभात्यपश्रितोरसानाꣳसंक्षरेमृतऽइतियदेतन्मण्डलंतपति-
तदन्नमथयऽएषऽएतस्मिन्मण्डलेपुरुषः । सोत्तासऽएतस्मिन्नन्नेपश्रितोभाती-
त्यधिदैवतम् ॥ १८ ॥ अथाध्यात्ममिदमेवशरीरमन्नमथयोयंदक्षिणेक्षन्पुरुषः
सोत्तासऽएतस्मिन्नन्नेपश्रितोभाति ॥ १९ ॥ तमेतमग्निरित्यध्वर्यवऽउपासते ।
यजुरित्येषहीदꣳ सर्व्वंयुनक्तिसामेतिच्छन्दोगाऽएतस्मिन्हीदꣳ सर्व्वꣳ समा-
नमुक्थमितिबह्वृचाऽएषहीदꣳ सर्वमुत्थापयतियातुरितियातुविदऽएतेनहीद-
दꣳसर्वंयतंविषमितिसर्पाःसर्पविदऽऊर्गितिदेवारयिरितिमनुष्या मायेत्यसुराः

स्वधेतिपितरोदेवजनऽइतिदेवजनविदोरूपमितिगन्धर्वागन्धऽइत्यप्सरसस्तंयथाय थौपासतेतदेव भवतितद्धैनान् भूत्वावतितस्मादेनमेवंवित्सर्वैरेवैतैरुपासीतसर्वैठ्ठं हैतद्भवतिसर्वैठ्ठं हैनमेतद्भूत्वाऽवति ॥ २० ॥ सऽएषत्रीष्टकोग्निऽऋगेकायजुरेकासामैकातद्यां काञ्चात्रर्चोपदधाति रुक्मऽएवतस्याऽआयतनमथयांयजुषा पुरुषऽएव तस्याऽ आयतनमथयाठ्ठंसाम्ना पुष्करपर्णमेव तस्याऽआयतनमेवत्रीष्टकः ॥ २१ ॥ तेवाऽएतेऽउभेऽएष चरुक्मऽएतच्च पुष्करपर्णमेतम् पुरुषमपीत उभेह्यृक्सामेयजुरपीतऽएवम्वेकेष्टकः ॥ २२ ॥ सऽएषऽएवमृत्युठ्ठं सऽएषऽएवमृत्युर्यऽएषऽएतस्मिन्मण्डले पुरुषोयश्चायंदक्षिणेक्षन् पुरुषः सऽएषऽएव विदऽआत्मा भवतिसयदेवग्विदस्माल्लोकात्प्रेत्यथैतमेवात्मानमभिसम्भवति सोऽमृतो भवतिमृत्युर्ह्यस्यात्मा भवति" ॥ २३ ॥ अनेन यथाशक्तिकृतेन सूर्योपस्थान कर्मणा श्रीसवितृसूर्यनारायणः प्रीयतां न मम । इत्युपस्थाय प्रदक्षिणीकृत्य नमस्कृत्य प्रागग्रदर्भेषूपविशेत । इति सूर्योपस्थानम् ।

अथ ब्रह्मयज्ञः ।

तत्र कर्ता स्वासने प्राङ्मुखोदङ्मुखो वोपविश्य आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य—"ममात्मनः श्रुति स्मृति पुराणोक्तफलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं यथाशक्ति ब्रह्मयज्ञेनाहं यक्ष्ये"। इति सङ्कल्प्य कुशानादायाऽङ्गानिस्पृशेत् ।

---

१ ब्रह्मयज्ञस्यकालश्छन्दोगपरिशिष्टोक्तो ग्राह्यः—" यश्चश्रुतिजपः प्रोक्तो ब्रह्मयज्ञस्तु स स्मृतः। स चार्वाक्तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः॥वैश्वदेवावसाने वा नान्यत्र ह्यनिमित्तकात् "

यथाह याज्ञवल्क्यः—" वेदाऽथर्वपुराणानि सेतिहासानि शक्तितः । जपयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकां जपेत् " ।

'ॐ तिर्य्यग्बिलाय चमसोर्ध्वबुध्नाय छन्दः पुरुषाय नमः'। इ
शिरसि। 'गोतमभरद्वाजाभ्यां नमः' **नेत्रयोः**। 'ॐ विश्वामि
जमदग्निभ्यां नमः' **श्रोत्रयोः**। 'ॐ वसिष्ठकश्यपाभ्यां नमः' **नास
पुटयोः**। 'ॐ अत्रये नमः' **वाचि**। 'ॐ गायत्र्यै छन्दसेऽग्नये नम
शिरसि। 'ॐ उष्णिहे छन्दसे सवित्रे नमः' **ग्रीवायाम्**। '
बृहत्यै छन्दसे बृहस्पतये नमः' **हनौ**। 'ॐ बृहद्रथन्तराभ्यांद्यावापृ
वीभ्यां नमः' **बाह्वोः**। 'ॐ त्रिष्टुभे छन्दसे इन्द्राय नमः' **नाभौ**
'ॐ जगत्यै छन्दसे आदित्याय नमः' **श्रोण्योः**। 'ॐ अतिच्छन्
प्रजापतये नमः' **लिङ्गे**। 'ॐ यज्ञायज्ञियाय छन्दसे वैश्वानराय नमः' दे
'ॐ अनुष्टुभे छन्दसे विश्वेभ्यो देवेभ्यो नमः' **ऊर्वोः**। 'ॐ पङ्क्त्यै छन्
मरुद्भ्यो नमः' **जान्वोः**। 'ॐ द्विपदायै छन्दसे विष्णवे नमः' **पादयोः**।'
विच्छन्दसे वायसे नमः' **नासापुटस्थ प्राणेषु**। 'ॐ न्यूनाक्षरा
च्छन्दसे अद्भ्यो नमः' **सर्वाङ्गेषु**। **हस्तौ प्रक्षाल्य**। एवमेवाङ्गा
योजयित्वा वेदमयः सम्पद्यते। न कुतश्चिद्भयंविन्दते। शापानुग्रहसामर्थ्
ब्राह्मं तेजश्च वर्द्धते। स्वर्गलोकः परं साधनं धर्मार्थकाममोक्षस्य च। त
दारिद्र्यदुःखशोकरोगभयं न भवति।

ततः—इषेत्वेत्यादि-खंब्रह्मान्तस्य माध्यन्दिनीयकस्य वाजसनेयक
यजुर्वेदाम्नायस्य विवस्वानृषिः गायत्र्यादीनि सर्वाणिच्छन्दांसि सर्वा
यजूंषि सर्वाणि सामानि प्रतिलिङ्गोक्ता देवता ब्रह्मयज्ञारम्भे विनियोगः
इति ऋष्यादिकं स्मृत्वा चतुर्वेदीय मन्त्रान् पठेत्।

यजुर्वेदः—' हरिः ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यम्भर्गो देवस्य धीमहि
धियो यो नः प्रचोदयात् ॥ ॐ इषेत्वोर्ज्जेत्वा वायवस्थ देवो वः
सविता प्रार्प्पयतु श्रेष्ठतमाय कर्म्मणऽआप्यायध्वमघ्न्याऽइन्द्राय भा

प्रजावतीरनमीवाऽअयक्ष्मा मा वस्तेनऽईशतमाऽघशंᳪ सो ध्रुवाऽअस्मिन् गोपतौ स्यात बह्वीर्य्यजमानस्यपशून्पाहि ॥ १ ॥"

ऋग्वेदः—"अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम्" ॥ २ ॥

सामवेदः—"ॐ अग्नऽआयाहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि" ॥ ३ ॥

अथर्ववेदः—"ॐ शन्नो देवीरभीष्टयऽआपो भवन्तुऽपीतये । शंय्योरभिस्रवन्तु नः" ॥ ४ ॥ इति चतुर्वेदीय मंत्रान्पठित्वा तान्कुशानुत्तरस्यां दिशि प्रक्षिपेत् ।

ततः साञ्जलिः—"ॐ यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्" । इति पठेत् । ततोऽनेन ब्रह्मयज्ञाख्येन कर्मणा श्रीभगवान् परमेश्वर प्रीयतां न मम । ॐ तत्सद्ब्रह्मार्पणमस्तु । एवं ब्रह्मयज्ञं विधाय तर्पणं कुर्यात् ।

अथ तर्पण प्रयोगः ।

तत्रादौ आचम्य प्राणनायम्य देशकालौ सङ्कीर्त्य अमुकगोत्रः अमुकशर्माहं (वर्मा, गुप्तोहं) "ममोपात्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थमुत्सर्जनाङ्गत्वेन देवर्षि मनुष्य पितृतर्पणं करिष्ये" । इति सङ्कल्प्य सव्येन प्राङ्मुखो

देवान्ध्यात्वा सव्यकरान्वारब्धसकुशे दक्षिणकरेण साक्षतोदकं गृहीत्वा प्रागग्रेण देवतीर्थेन एकैकमञ्जलिं ॐकार पूर्वं ब्रह्मादिदेवेभ्यो दद्यात् ।

तत्रादौ आवाहनम्–ततःसाञ्जलिः–" ॐ विश्वे देवासऽआगत शृणुतामऽइमꣳ हवम् । एतम्बर्हिर्निषीदत ॥ १ ॥ विश्वेदेवाः शृणुतेमꣳ हवम्मे येऽअन्तरिक्षेयऽउपद्यविष्ठ । येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन्बर्हिषिमादयध्वम् " ॥ २ ॥ आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ये तर्पणेऽत्र विहिताः सावधाना भवन्तु ते ॥ ३ ॥ **इत्यावाह्य एकैकमञ्जलिं साक्षतोदकेन दद्यात् ।**

अथ देव तर्पणम् ।

तद्यथा–ॐ ब्रह्मा तृप्यताम् १ ॐ विष्णुस्तृप्यताम् १ ॐ रुद्रस्तृप्यताम् १ ॐ प्रजापतिस्तृप्यताम् १ ॐ देवास्तृप्यंताम् १ ॐ छन्दांसि तृप्यन्ताम् १ ॐ वेदास्तृप्यन्ताम् १ ॐ ऋषयस्तृप्यन्ताम् १ ॐ पुराणाचार्यास्तृप्यन्ताम् १ ॐ गन्धर्वास्तृप्यन्ताम् १ ॐ इतराचार्या

---

१ मार्कण्डेयः–" जपे होमे तथा दाने स्वाध्याये पितृतर्पणे अशून्यं तु करं कुर्यात्सुवर्णरजतैः कुशैः "॥

२ तर्पणेदर्भ विचारः दक्षस्मृतौ–" प्रादेशमात्रमुद्धृत्य सलिलं प्राङ्मुखः सुरान् । उदङ् मनुष्यांस्तृप्येत्तु पितृन्दक्षिणतस्तथा ॥ अग्रैस्तु तर्पयेद्देवान् मनुष्यान् कुशमध्यतः । पितृंस्तु कुशमूलाग्रैर्विधिः कौशो यथाक्रमम् "॥

अग्निपुराणे च–" प्रागग्रेषु सुरांस्तृप्येन्मनुष्यांश्चैव मध्यतः । पितृंश्च दक्षिणाग्रेषु दद्यादिति जलाञ्जलीन्" ॥

३ व्यासः–" एकैकमञ्जलिं देवा द्वौ द्वौ तु सनकादयः । अर्हन्ति पितरस्त्रींस्त्रीन् स्त्रिय एकैकमञ्जलिम् "

स्तृप्यन्ताम् १ ॐ संवत्सरः सावयवस्तृप्यताम् १ ॐ देव्यस्तृप्यन्ताम् १ ॐ अप्सरसस्तृप्यन्ताम् १ ॐ देवानुगास्तृप्यन्ताम् १ ॐनागास्तृप्यन्ताम् १ ॐ सागरास्तृप्यन्ताम् १ ॥ ॐ पर्वतास्तृप्यन्ताम् १ ॐ सरितस्तृप्यन्ताम् १ ॐ मनुष्यास्तृप्यन्ताम् १ ॐ यक्षास्तृप्यन्ताम् १ ॐ रक्षांसि तृप्यन्ताम् १ ॐ पिशाचास्तृप्यन्ताम् १ ॐ सुपर्णास्तृप्यन्ताम् १ ॐ भूतानि तृप्यन्ताम् १ ॐ पशवस्तृप्यन्ताम् १ ॐ वनस्पतयस्तृप्यन्ताम् १ ॐ औषधयस्तृप्यन्ताम् १ ॐ भूतग्रामश्चतुर्विधस्तृप्यताम् १ ।

अथ ऋषितर्पणम् ।

एवमेव—ॐ मरीचिस्तृप्यन्ताम् १ ॐ अत्रिस्तृप्यताम् १ ॐ अङ्गिरास्तृप्यताम् १ ॐ पुलस्त्यस्तृप्यताम् १ ॐ पुलहस्तृप्यताम् १ ॐ क्रतुस्तृप्यताम् १ ॐ प्रचेतास्तृप्यताम् । ॐ वसिष्ठस्तृप्यताम् १ ॐ भृगुस्तृप्यताम् १ ॐ नारदस्तृप्यताम् १

अथ दिव्यमनुष्य तर्पणम् ।

ततो निवीती (कण्ठी कृत्वा) उदङ्मुख उत्तराग्रेण कुशेन प्रजापतितीर्थेन यवोदकेन च सनकादीन् प्रत्यकं द्विवारं तर्पयेत् ।

तद्यथा—ॐ सनकस्तृप्यताम् २ ॐ सनन्दनस्तृप्यताम् २ ॐ सनातनस्तृप्यताम् २ ॐ कपिलस्तृप्यताम् । २ ॐ आसुरिस्तृप्यताम् २ ॐ वोढुस्तृप्यताम् २ ॐ पञ्चशिखस्तृप्यताम् । २ ।

१—वाचस्पतिः—"निवीती हन्तकारेण मनुष्यांस्तर्पयेदथ" ।

औशनसस्मृतौ—'निवीतं कण्ठलम्बनम्' । "ब्रह्मसूत्रेऽत्र सव्येंऽसे स्थिते यज्ञोपवीतिता । प्राचीनावीतिताऽसव्ये कण्ठस्थे तु निवीतिता" ।

२—'कनिष्ठाङ्गुलिमूले प्रजापति तीर्थम्' ।

अथ दिव्यपितृतर्पणम् ।

ततोऽपसव्यं (प्राचीनावीतं) कृत्वा दक्षिणाभिमुखः सव्यं जान्वाच्य पितृतीर्थेन मोटकरूपकुशत्रयेण संतिलचन्दनोदकेन कव्यवाडादीन् प्रत्येकं त्रीस्तर्पयेत् ।

तद्यथा—ॐ कव्यवाडनलस्तृप्यतामिदं तिलोदकं तस्मै स्वधानमः ॥ ३ ॥ ॐ सोमपास्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ॥ ३ ॥ ॐ यमस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ॥ ३ ॥ ॐ अर्यमातृप्यतामिदं तिलोदकं तस्मै स्वधानमः ॥ ३ ॥ ॐ अग्निष्वात्ताः पितरस्तृप्यन्तामिदं तिलोदकं तेभ्यः स्वधानमः ॥ ३ ॥ ॐ सोमपाः पितरस्तृप्यन्तामिदं तिलोदकं तेभ्यः स्वधानमः ॥ ३ ॥ ॐ बर्हिषदः पितरस्तृप्यन्तामिदं तिलोदकं तेभ्यः स्वधानमः ॥ ३ ॥

अथ चतुर्दशयम तर्पणम् ।

एवमेव—ॐ यमाय नमः ३ । ॐ धर्मराजाय नमः ३ । ॐ मृत्यवे नमः ३ ॥ ॐ अन्तकाय नमः ३ ॥ ॐ वैवस्वताय नमः ३ । ॐ कालाय नमः ३ ॥ ॐ सर्वभूतक्षयाय नमः ३ ॥ ॐ औदुम्बराय

---

१ औशनसस्मृतौ—" सव्यबाहुं समुद्धृत्य दक्षिणेन धृतं द्विजैः । प्राचीनावीतमित्युक्तं पित्र्ये कर्मणि धारयेत् "।

२ वायुपुराण—" तिलदर्भैस्तु संयुक्तं श्रद्धया यत्प्रदीयते । तत्सर्वममृतं भूत्वा पितॄणामुपतिष्ठते "।

३ पारस्कर गृ० परिशिष्टे—तत्र कव्यं पित्र्यं हविर्वहतीति कव्यवाट् अनलोऽग्निः कव्यवाट् चासौ अनलश्चेति कव्यवाडनलस्तम् । अत्र केचित् " कव्यवाहमनलम् " इति द्वे देवते मन्यन्ति ।

तदयुक्तम्–" हव्यवाहनो वै देवानां कव्यवाहनः पितॄणाम् "। इतिश्रुतेः कव्यवाड्गुणविशिष्टोऽनलः पितृणामन्तर्गत इति कव्यवाडनल एकैव देवता ।

नमः ॥ ३ ॥ ॐ दध्नाय नमः ॥ ३ ॥ ॐ नीलाय नमः ॥ ३ ॥ ॐ परमेष्ठिने नमः ॥ ३ ॥ ॐ वृकोदराय नमः ॥ ३ ॥ ॐ चित्राय नमः ॥३॥ ॐ चित्रगुप्ताय नमः ॥ ३ ॥ इति चतुर्दशयमान् प्रत्येकं सतिलाञ्जलित्रयेण तर्पयेत ।

अथ मनुष्यपितृतर्पणम् ।

तत्राऽऽदौ आवाहनम्-ततः साञ्जलिः-"ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि । उशन्नुशत ऽआवह पितृन्हविषेऽअत्तवे ॥ आगच्छन्तु मे पितर इमं गृह्णन्त्वपोञ्जलिम्" ॥ इति पितृनावाह्य-"ॐ अद्यामुकगोत्रोऽस्मत्पिताऽमुकशर्मा (**वर्मा, गुप्तः**) वसुस्वरूपस्तृप्यतामिदं सतिलं जलं तस्मै स्वधा नमः । इत्येकमञ्जलिं दत्वा एवमपरमञ्जलिद्वयं पित्रे दद्यात् ॥ ३ ॥

"ॐ अद्यामुकगोत्रोऽस्मत्पितामहोऽमुकशर्मा (**वा गुप्तः**) रुद्रस्वरूपस्तृप्यतामिदं सतिलं जलं तस्मै स्वधा नमः" । इत्येकमञ्जलिं दत्वा एवमपरमञ्जलिद्वयं पितामहाय दद्यात ॥ ३ ॥

"ॐ अद्यामुकगोत्रोऽस्मत्प्रपितामहोऽमुकशर्मा (**वा गुप्तः**) आदित्यस्वरूपस्तृप्यतामिदं सतिलं जलं तस्मै स्वधा नमः" । इत्येकमञ्जलिं दत्वा एवमपरमञ्जलिद्वयं प्रपितामहाय दद्यात् ॥ ३ ॥

ततः-ॐ तृप्यध्वम् । तृप्यध्वम् । तृप्यध्वम् । इति पित्रादिभ्योऽञ्जलित्रयं दद्यात् ।

---

१ पितृतर्पणेऽञ्जलिसंख्यामाह-"एकैकस्य तिलैर्मिश्रान् त्रींस्त्रीन्दद्याज्जलाञ्जलीन् । यावज्जीवकृतं पापं तत्क्षणादेव नश्यति" ।

अथ मातृ तर्पणम् ।

ॐ अद्याऽमुकगोत्राऽस्मन्माताऽमुकी देवीदा[२] गायत्री स्वरूपा तृप्यतामिदं सतिलं जलं तस्यै स्वधानमः"। इत्येकमञ्जलिं मात्रे दत्त्वा पुनरञ्जलिद्वयं दद्यात् ॥ ३ ॥

" ॐ अद्याऽमुकगोत्राऽस्मत्पितामही अमुकी देवीदा सावित्रीस्वरूपा तृप्यतामिदं सतिलं जलं तस्यै स्वधानमः"। इत्येकमञ्जलिं दत्त्वा पुनरञ्जलिद्वयं दद्यात् ॥ ३ ॥

" ॐ अद्याऽमुकगोत्राऽस्मत्प्रपितामही अमुकीदेवीदा स्वरस्वतीस्वरूपा तृप्यतामिदं सतिलं जलं तस्यै स्वधानमः"। इत्येकमञ्जलिं दत्त्वा पुनरञ्जलिद्वयं दद्यात् ॥ ३ ॥

" ॐ अद्यामुकगोत्राऽस्मत्सापत्नमाता[३] (सौतेली मा) अमुकी देवीदा गायत्री स्वरूपा तृप्यतामिदं सतिलं जलं तस्यै स्वधा नमः" इत्येकमञ्जलिं दत्त्वा पुनरञ्जलिमेकं[४] दद्यात् ॥ २ ॥ ॐ तृप्यध्वम् ३ ।

अथ द्वितीयगोत्रतर्पणम् ।

ॐ अद्यामुकगोत्रोऽस्मन्मातामहोऽमुकशर्मा (वा गुप्तः) वसुस्वरूपस्तृप्यतामिदं सतिलं जलं तस्मै स्वधा नमः"। इत्येकमञ्जलिं मातामहाय दत्त्वा पुनरञ्जलिद्वयं दद्यात ॥ ३ ॥

१–नागदेवाचारप्रदीपे शालङ्कायनः–मातृमुख्याश्च यास्तिस्रस्तासां दद्याज्जलाञ्जलीन् । त्रीस्त्रींश्चैव ततश्चान्यास्तामेकैकमञ्जलिम्" ॥

पुनस्तत्रैव–' माता पितामही चैव तथैव प्रपितामही । एतासां पितृवद्दद्याच्छेषास्त्वेकैकमञ्जलिम्" ।

२–गोभिलसूत्रे–"स्त्रीणां दान्तं नाम ज्ञेयम्" ।

३ सांख्यायनः–" मातृमुख्यास्तु यास्तिस्रस्तासां त्रींस्त्रीञ्जलाञ्जलीन् । सपत्नाचार्य पत्नीनां द्वौ द्वौ दद्याज्जलाञ्जली "।

४ हारीतः–" आर्द्रवासा जले कुर्यात्तर्पणाचमनं जपम् । शुष्कवासाः स्थले कुर्यात्तर्पणाचमनं जपम् "॥

विष्णुः–" स्थले स्थित्वा जले यस्तु प्रयच्छेदुदकं नरः । नोपतिष्ठति तद्वारि पितॄणां तन्निरर्थकम् " ।

"ॐ अद्यामुकगोत्रोऽस्मत्प्रमातामहोऽमुकशर्मा (वा गुप्तः) रुद्रस्वरूपस्तृप्यतामिदं सतिलं जलं तस्मै स्वधा नमः" ॥ पुनरञ्जलि द्वयं दद्यात् ॥ ३ ॥

"ॐ अद्यामुकगोत्रोऽस्मद् वृद्ध प्रमातामहोऽमुकशर्मा (वा गुप्तः) आदित्यस्वरूपस्तृप्यतामिदं सतिलं जलं तस्मै स्वधा नमः"। पुनरञ्जलिद्वयं दद्यात् ॥ ३ ॥

ततः—"ॐ अद्यामुकगोत्राऽस्मन्मातामही अमुकी देवीदा गायत्री स्वरूपा तृप्यतामिदं सतिलं जलं तस्यै स्वधा नमः" इत्येकमञ्जलिं दद्यात् ॥ १ ॥

"ॐ अद्यामुकगोत्राऽस्मत्प्रमातामही अमुकी देवीदा सावित्रीस्वरूपा तृप्यतामिदं सतिलं जलं तस्यै स्वधा नमः ॥ १ ॥

"ॐ अद्यामुकगोत्राऽस्मद् वृद्धप्रमातामही अमुकी देवीदा सरस्वतीस्वरूपा तृप्यतामिदं सतिलं जलं तस्यै स्वधा नमः" ॥ १ ॥

अथाऽऽचार्यादितर्पणम्।

"ॐ अद्यामुकगोत्रोऽस्मदाचार्योऽमुकशर्मा वसुरूपस्तृप्यतामिदं सतिलं जलं तस्मै स्वधा नमः" ॥ ३ ॥

ॐ अद्याऽमुकगोत्राऽस्मदाचार्यपत्नी अमुकी देवीदा गायत्री स्वरूपा तृप्यतामिदं सतिलं जलं तस्यै स्वधा नमः ॥ २ ॥

ततो भार्यां पुत्रं पितृव्यं तत्पत्नीं मातुलं तत्पत्नीं भ्रातरं तत्पत्नीं पितृष्वसारं (बुआ) मातृष्वसारं (मौसी) श्वसुरं श्वश्रूं पुत्रिकां भगिनीं पितृव्यपुत्रं भ्रातृपुत्रं मातुलपुत्रं श्यालकं गुरुपुत्रं जामातरं भामं (भगिनीपतिं) पौत्रं भागिनेयं दौहित्रं मित्रं सुहृच्छिष्यांश्च तर्पयेत्।

ततः सव्येन—"ॐ देवासुरास्तथा यक्षा नागा गन्धर्वराक्षसाः। पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः ॥ जलेचरा भूनिलया वाय्वाधाराश्च जन्तवः। प्रीतिमेते प्रयान्त्वाशु मद्दत्तेनाम्बुनाखिलाः" ॥

ततोऽपसव्यं दक्षिणाभिमुखः—"नरकेषु समस्तेषु यातनासु च ये स्थिताः । तेषामाप्यायनार्थं तद्दीयते सलिलं मया ॥ येऽबान्धवा बान्धवाश्च येऽन्य जन्मनि बान्धवाः । ते सर्वे तृप्तिमायान्तु ये चास्मत्तोयकांक्षिणः ॥ ये मे कुले लुप्तपिण्डाः पुत्रदार विवर्जिताः । तेषांहि दत्तमक्षय्यमिदमस्तु तिलोदकम् ॥ आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः । तृप्यन्तु पितरः सर्वे मातृमातामहादयः ॥ अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् । आ ब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम् "॥ इति मन्त्रैः पृथक् पृथक् सतिलमुदकं दद्यात ।

अथ वस्त्रनिष्पीडनम् ।

ततस्तिलदर्भसमन्वितंवस्त्रं[1] चतुर्गुणीकृत्य जले निमज्जय—"ॐ ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः । ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् "॥ इति पठित्वा स्नानवस्त्रं भूमावेव स्ववामभागे निष्पीडयेत् । न पादौ न जलाद्रौ[2] ।

अथ भीष्मतर्पणम्[3] ।

"ॐ वैयाघ्रपदगोत्राय साङ्कृतिप्रवराय च । गङ्गापुत्राय भीष्माय प्रदास्येऽहं तिलोदकम् । अपुत्राय ददाम्येतत् सलिलं भीष्मवर्मणे " ॥ इति

---

१ योगियाज्ञवल्क्यः—" वस्त्रनिष्पीडितं तोयं स्नातस्योच्छिष्टभागिनः । भागधेयं श्रुतिः प्राह तस्मान्निष्पीडयेत्स्थले "॥

वृद्धयोगी—" यावदेतानृषींश्चैव पितृंश्चापि न तर्पयेत् । तावन्न पीडयेद्वस्त्रं येन स्नातो भवेन्नरः "।

स्मृत्यन्तरे—" वस्त्रं चतुर्गुणी कृत्य पीडयेच्च जलाद्बहिः । वामप्रकोष्ठे निक्षिप्य द्विराचम्य शुचिर्भवेत् "

२ बृहत्पराशरः—" निष्पीडयेत्स्नानवस्त्रं तिलदर्भसमन्वितम् । न पूर्वं तर्पणाद्वस्त्रं नैवाम्भसि न पादयोः " ॥

३ महाभारते—" ब्राह्मणाद्याश्च ये वर्णा दद्युर्भीष्माय नो जलम् । सम्वत्सरकृतं तेषां पुण्यं नश्यति सत्तम " ।

मन्त्रेण पितृतीर्थेन तिलोदकं दद्यात् । तीर्थजले पवित्रं विसृजेत् ।

ततः सव्यं कृत्वाऽऽचम्य प्राणानायम्य तर्पणोत्तरकर्म कुर्यात् । तत्रक्रमः–" ॐ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे । जगत्सवित्रे शुचये नमस्ते कर्मदायिने " ॥ १ ॥ इति मन्त्रेण सूर्याय सतिलाञ्जलिं दत्वा आचम्य ब्रह्मादीन् तत्तल्लिङ्गैर्मन्त्रै-रर्चयेत् ।

तत्रक्रमः-" ॐ ब्रह्मजज्ञानं प्रथम पुरस्ताद्विसीमत ÷ सुरुचोव्वेनऽ आवऽ । सबुध्न्याऽउपमाऽअस्यविष्ठाऽ सतश्च योनिमसतश्चव्विवं ÷ " ॥ ॐ ब्रह्मणे नमः । "ॐ इदम्विष्णुर्विचक्रमेत्रेधा निदधे पदम् । समूढम–स्यपा ँ सुरे स्वाहा " ॥

ॐ विष्णवे नमः । "ॐ नमस्ते रुद्रमन्यवऽउतोतऽइषवे नमं ÷ । बाहुभ्यामुतते नमं ÷ " ॥ ॐ रुद्राय नमः । " ॐ तत्सवितुर्वरेण्य-म्भर्गो देवस्य धीमहि । धियोयो नं ÷ प्रचोदयात्" ॥ ॐ सवित्रे नमः । "ॐ मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि । द्युम्नश्चित्रश्रवस्तमम् " ॥ ॐ मित्राय नमः । "ॐ इमम्मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके" ॥ ॐ वरुणाय नमः ।

अथ सूर्योपस्थानम् ।

ततस्तिष्ठनूर्ध्वबाहुः सूर्यमुदीक्षन् पठेत्- "ॐ अदृश्रमस्यकेत-वोविरश्मयोजनाँ २।। ऽअनु । भ्राजन्तोऽअग्नयो यथा । उपयाम गृहीतोऽसि

१ ब्राह्मण सर्वस्वे–"ततोऽर्घ्यं भानवे दद्यात्तिल पुष्प समन्वितम् । उत्थाय मूर्ध्निपर्यन्तं हंसः शुचिषदित्यृचा" । हंसः अध्वानं हन्ति गच्छतीति हंसः सूर्यः शुचिषत् शुचावग्निमण्डले सीदति तिष्ठतीति शुचिषत् ।

सूर्य्यां यत्वा भ्राजायैषते योनिर्ं सूर्य्यां यत्वा भ्राजाय। सूर्य्यभ्राजिष्ठ भ्राजिष्ठस्त्वंदेवेष्वसि भ्राजिष्ठोऽहम्मनुष्येषु भूयासम्॥ॐ हुठंसऽशुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत्"॥इत्याभ्यां सूर्यमुपस्थाय प्रदक्षिणीकृत्य नमस्कृत्य दिग्देवताश्च प्रणमेत् । "ॐ दिग्भ्यो नमः । ॐ दिग्देवताभ्यो नमः । ॐ ब्रह्मणे नमः । ॐ अग्नये नमः । ॐ पृथिव्यै नमः । ॐ ओषधिभ्यो नमः । ॐ वाचे नमः । ॐ वाचस्पतये नमः । ॐ विष्णवे नमः । ॐ महद्भ्यो नमः । ॐ अद्भ्यो नमः । ॐ अपाम्पतये वरुणाय नमः ।" इति प्रणम्योपविश्य शुद्धोदकेन संवर्चसेति मन्त्रेण मुखं विमृजेत् ।

तत्रमंत्रः–"ॐ संवर्चसा पयसा सन्तनूभिरगन्महि मनसा सठंशिवेन । त्वष्टासुदत्रोविदधातुरायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् " इति ।

ततो विसर्जनम्–" देवागातुविदो गातुं वित्त्वा गातुमित । मनसस्पतऽइमन्देवयज्ञठंस्वाहाव्वातेधाः ॥ यथाशक्ति कृतेनानेन देवर्षिमनुष्यपितृतर्पणाख्येन कर्मणा भगवान् मम समस्त पितृस्वरूपी जनार्दनः प्रीयतां न मम । ॐ तत्सद्ब्रह्मार्पणमस्तु । ॐ विष्णवे नमः ॥ ३ ॥

इति श्रीरत्नदुर्गनिवासिना श्रीगौड़वंशावतंसेन वशिष्ठगोत्रोद्भवेन शिवालोपाह्वेन पंडित श्रीकस्तूरी चन्द्र पौत्रेण श्रीचतुर्थीलालात्मजेन श्रीगङ्गाधर शर्मणा तामडायतेन संगृहीताया वाजसनेयिनां "चातुर्थीलाली-उपाकर्म पद्धत्या जलाशयकृत्य प्रयोगात्मकः प्रथमो विभागः समाप्तः ॥

अथ ऋषीणां पूजन प्रकारः ।

तत्र तावत्कर्ता शुद्धः सन् नवेवाससी परिधाय, तीर्थतीरे गृहे वाऽन्य-शुद्धस्थले आगत्य, पूजासम्भारान्सर्वान्नियुज्य, देवपूजनार्थे शुद्धकाष्ठपट्टोपरि नवं सदशं धौतं वस्त्रं प्रसार्य तदुपरि गणपत्यादिदेवान् संस्थाप्य, द्वितीय-वस्त्राच्छादिते पीठे अपामार्गमिश्रितैस्त्रिभिस्त्रिभिर्दर्भैः[1]पृथग् पृथग् गायत्रीं जप्त्वा ब्रह्मग्रन्थियुक्तान्सारुन्धतीकान् सप्तर्षीन् प्रागग्रानुदगग्रान्वा संस्थाप्य, अक्षत पुञ्जे घृतदीपं प्रज्वलय्य स्थापयेत्[2]। ततः सुमुहूर्ते स्वासने प्राङ्मुख उदङ्मुखो-

---

१ अपामार्ग मिश्रितैस्त्रिभिस्त्रिभिः कुशैः पृथग् पृथग् गायत्रीं पठित्वा ब्रह्म-ग्रन्थियुक्ताः सप्तर्षयः कार्याः । ते च पीठे नवं सदशं धौतं वस्त्रं रम्भापत्रं वा प्रसार्य तस्मिन्प्रागग्रा उदगग्रावा स्थापनीयाः ।

तथा च कात्यायनः—" कश्यपादीनृषीन्सप्त कृत्वा दर्भमयान् शुभान् । पूजयित्वा विधानेन तर्पयेच्छन्दसां गणम् " ।

अन्यश्च—" अपामार्गसमिश्राणां कुशादीनां त्रिभिस्त्रिभिः कुर्यात्सप्त ऋषीं-श्चैव पूजयेच्च यथाक्रमम् " ॥

विधानपारिजाते कृष्णाजिनिः—" उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च । ऋषीन्दर्भमयान् कृत्वा पूजयेत्तर्पयेत्ततः " ॥

व्यासः—" विष्टरं सप्तभिर्दर्भैर्द्वादशाङ्गुलदैर्घ्यकम् । चतुरङ्गुलमग्रेस्याद्ग्र-न्थिरेकाङ्गुलस्तथा । प्रदक्षिणश्रमं कृत्वा ऋषीनावाह्य पूजयेत् " ॥

रेणुदीक्षितकारिकायाम्—"प्रतिष्ठावाहनं चैव कालज्ञानं भवेत्ततः । पूजोप-वीती दानं स्यात्प्राचीनावीतिपूर्वकम् ॥ उत्सर्गः पितरश्चैव आचान्तो वंशकीर्तनम्॥ तत्सवितुरित्यारभ्य गायत्र्या ब्रुवणं चतुः । विरताः स्मेति च सकृदध्यायादीन्प-ठेत्ततः । तदेतदृचाऽभ्युक्तं नमस्कारो विसर्जनम्" ॥

२ तन्त्रसारे—" दीपं न स्थापयेद्भूमौ "। इति वाक्यात् ॥

" विना दीपेन सकला कार्य सिद्धिर्न जायते । अतः प्रकाशको दीपः पूर्वं स्थाप्यो यथा विधि "॥ दीपकश्च गोघृत सम्पादितो वेदितव्यः । " दीपे देयं च गोघृतम् "। इत्युक्तेरिति बोध्यम् ।

वोपविश्यकेशरचन्दनादिना स्वस्तितिलकं विधाय, सप्रणवगायत्र्या शिखां बद्ध्वाऽऽचम्य प्राणानायम्य स्वस्तिपाठं पठेत् ।

अथ स्वस्तिपाठ मन्त्राः ।

"हरिः ॐ स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ १ ॥ पयः पृथिव्याम्पयऽ ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः । पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ २ ॥ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि । वैष्णवमसि विष्णवे त्वा ॥ ३ ॥ अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता । वसवो देवता रुद्रा देवताऽऽदित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥ ४ ॥ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ ५ ॥ विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रन्तन्नऽआसुव ॥ ६ ॥ एतन्ते देव सवितर्यज्ञम्प्राहुर्बृहस्पतये ब्रह्मणे । तेन यज्ञमव तेन यज्ञपतिन्तेन मामव" ॥ ७ ॥ ॐ शान्तिः शान्तिः सुशान्तिर्भवतु । सर्वारिष्ट शान्तिर्भवतु । प्रारब्धे कर्मणि निर्विघ्नतास्तु ॥ **इति स्वस्तिपाठं पठित्वा लक्ष्मीनारायणादिदेवान् प्रतिमन्त्रं प्रणमेत् ।**

---

१ नागदेवः—"अमन्त्रो दीयते ग्रन्थिर्जपो होमो वृथा भवेत् । स्मृत्वोङ्कारं च गायत्रीं निबध्नीयाच्छिखां ततः" ॥

ग्रन्थान्तरे—"स्नाने दाने जपे होमे सन्ध्यायां देवतार्चने । शिखाग्रन्थिं विना कर्म न कुर्याद्वै कदाचन" ॥

"ॐ श्रीमन्महागणाधिपतये नमः । ॐ लक्ष्मीनारायणाभ्यां नमः । ॐ उमामहेश्वराभ्यां नमः । ॐ वाणी हिरण्यगर्भाभ्यां नमः । ॐ शचीपुरन्दराभ्यां नमः । ॐ मातापितृचरणकमलेभ्यो नमः । ॐ कुलदेवताभ्यो नमः । ॐ इष्टदेवताभ्यो नमः । ॐ ग्रामदेवताभ्यो नमः । ॐ स्थान देवताभ्यो नमः । ॐ वास्तुदेवताभ्यो नमः । ॐ सूर्यादि ग्रहेभ्यो नमः । ॐ सर्वेभ्योदेवेभ्यो नमः । ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः । ॐ एतत्कर्मप्रधान देवताभ्यो नमः । " इति देवान् प्रणम्य[१] "पुण्यं पुण्याहं दीर्घमायुरस्तु" इति पठेत ।

ततश्च–" ॐ सुमुखश्चैकदन्तश्च कपिलोगजकर्णकः । लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥ १ ॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ २ ॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा । सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥ ३ ॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ ४ ॥ अभीप्सितार्थ सिद्ध्यर्थं पूजितो यः सुरासुरैः सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ ५ ॥ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थ साधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते ॥ ६ ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ॥ ७ ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ ८ ॥ वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ । अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा" ॥ ९ ॥ इति पठित्वा सङ्कल्पं कुर्यात् ।

अथ प्रधान सङ्कल्पः ।

तत्रादौ स्वदक्षिणहस्ते जलगन्धाक्षतपुष्पद्रव्याण्यादाय

---

१ "आयुः पुमान्यशः कीर्तिं तेजः पुष्टिं बलं श्रियम् । पशुं सुखं धनं धान्यं प्राप्नुयात्पितृवन्दनात्" ॥

हरिः ॐ विष्णुर्विष्णुर्विष्णुः ॐ तत्सदद्यैतस्य श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्त्तमानस्याद्य श्रीब्रह्मणो द्वितीये परार्द्धे एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसेऽह्नो द्वितीये यामे तृतीये मुहूर्त्ते रथन्तरादिद्वात्रिंशत्कल्पानां मध्येऽष्टमे श्रीश्वेतवाराहकल्पे स्वायम्भुवादिमन्वन्तराणां मध्ये, सप्तमे वैवस्वतमन्वन्तरे, कृतत्रेताद्वापरकलिसंज्ञकानां चतुर्णां युगानां मध्ये वर्त्तमानेऽष्टाविंशतितमे कलियुगे तत्प्रथमचरणे,तथा पञ्चाशत्कोटियोजनविस्तीर्णे भूमण्डलान्तर्गत सप्तद्वीपमध्यवर्तिनि जम्बूद्वीपे,तत्रापि परमपवित्रे भारते वर्षे, आर्यावर्तान्तर्गतब्रह्मावर्तैकदेशे, अमुक क्षेत्रे (**कुमारिका नाम क्षेत्रे**) श्रीगङ्गायमुनयोर्महानद्योरमुकदिग्भागे (**दक्षिणे भागे**) नर्मदाया उत्तरे भागे, श्रीबौद्धावतारे, अमुकदेशे, (**मरुदेशे**) अमुक नगरे (**बीकानेर मण्डलान्तर्गत रत्नदुर्गे** श्रीचान्द्रसंज्ञकानां प्रभवादि षष्टि सम्वत्सराणां मध्येऽमुकनाम्नि सम्वत्सरे, श्रीमन्नृपति विक्रम र्क समयादमुकसंख्याके सम्वत्सरे, अमुकायने. (**दक्षिणायने**) अमुकर्तौ (**वर्षर्तौ**) अमुकमासे (**श्रावणमासे**) अमुकपक्षे (**शुक्लपक्षे**) अमुकतिथौ (**पूर्णिमायां**) अमुकवासरे, अमुकगोत्रः अमुकशर्माहं **वर्मा, गुप्तोऽहंवा**) "ममात्मनः श्रुतिस्मृतिपुराणोक्तफल प्राप्तिपूर्वकं श्रीपरमेश्वर प्रीत्यर्थमुत्सर्जनाङ्गत्वेनारुन्धतीसहितानां कश्यपादि सप्तर्षीणां स्थापनं पूजनं च करिष्ये"।

'तदङ्गत्वेनादौ निर्विघ्नतापरिसमाप्त्यर्थं गणपतिपूजनं मातृकापूजनं सूर्यादिग्रहपूजनं कलशस्थापनपूजनपूर्वकं श्रीमहाविष्णुपूजनं च करिष्ये।' **इति सङ्कल्पयेत्।**

---

१ "प्रारम्भे कर्मणां विप्र पुण्डरीकं स्मरेद्धरिम्। नारायणं नमस्कृत्य सर्वकर्माणि कारयेत्" ॥ इत्यादिस्मृतेर्विष्णुपदोच्चारणम्। त्रिरुक्तिस्तु आदरार्था।

तत्रादौकर्मार्थं गङ्गाजलपूरितकलशार्चनम्—ततःस्ववामभागेऽक्षतान्निक्षिप्य तदुपरिजलपूर्णं कण्ठेरक्तसूत्रेणनिबद्धकुङ्कुमादिचर्चितताम्रकलशमेकं स्थापयेत् ।

ततो दक्षिणहस्ते पुष्पाक्षतानादाय—ॐ तत्त्वायामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो व्वरुणेह बोध्युरुशꣳस मा न ऽआयुः प्रमोषीः" ॥ १ ॥ अस्मिन्कलशे 'भगवन्वरुण इहागच्छ इहतिष्ठ' इति वरुणमावाह्य—'ॐ अपाम्पतिवरुणाय नमः' इति नाम मन्त्रेण पञ्चोपचारैः सम्पूज्य दक्षिण हस्तस्याऽनामिकया कलशमालभ्याभिमन्त्रयेत् ।

अथाऽभिमन्त्रण मन्त्राः ।

"ॐ कलशस्य मुखे विष्णुः कण्ठेरुद्रः समाश्रितः । मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ १ ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ २ ॥ अङ्गैश्च सहिताः सर्वे कलशन्तु समाश्रिताः" ॥ ३ ॥ इत्यभिमन्त्र्य कलशे गङ्गाद्यावाहनं कुर्यात् ।

---

१ "सुवासितजलैः पूर्णं वामे कुम्भं सुपूजयेत् । कलशस्येति मन्त्रेण तीर्थान्यावाहयेत्ततः" इति ।

२ कर्म्मप्रदीपे—"गन्धपुष्पे धूपदीपौ नैवेद्य इति पञ्चकम् । पञ्चोपचारमाख्यातं पूजने तत्त्वविद्बुधैः" ॥

३ देवयाज्ञिकः—"स्पृशन्स्वनामिकाग्रेण क्वचिदालोकयन्नपि । अनुमन्त्रणं सर्वत्र सदैवमनुमन्त्रयेत्" ॥

अथ गङ्गाद्यावाहनम् ।

"ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु" ॥ १ । **अस्मिन्कलशे सर्वाणि तीर्थान्यावाहयामि पूजयामि नमस्करोमीत्यावाह्य**—'ॐ गङ्गादि तीर्थेभ्यो नमः' । **इति नाम मन्त्रेण गन्धादिभिः सम्पूज्य प्रार्थयेत् ।**

अथ प्रार्थना मन्त्राः ।

"ॐ देव दानव सम्वादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ ! विधृतो विष्णुना स्वयम् ॥ १ ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ २ ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्राः विश्वेदेवाः सपैत्रिकाः ॥ ३ ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः । त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव । सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा" ॥ ४ ॥ ॐ पाशपाणे नमस्तुभ्यं पद्मिनी जीवनायक । यावत्कर्मावशानः स्यात्तावत्त्वं सन्निधौ भव" ॥ ५ ॥ **इति सम्प्रार्थ्य दूर्वाभिः कलशोदकेन पूजासम्भारान्स्वात्मानं च सम्प्रोक्षयेत् ।**

अथ प्रोक्षणमन्त्रः ।

"ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः" ॥ १ ॥ ॐ पुण्डरीकाक्षः पुनातु ३। **इति सम्प्रोक्ष्य दीप पूजनं कुर्यात् ।**

---

१ श्राद्धविवेके—"नाप्रोक्षितं स्पृशेत्किञ्चिद्दैवे पित्र्ये च कर्मणि" ।

अथ दीप पूजनम्।

तत्रादौ प्रार्थना—"भो दीप ब्रह्मरूपस्त्वं अन्धकार निवारकः। इमां मया कृतां पूजां गृहँस्तेजः प्रवर्धय" ॥ १ ॥ **इति सम्प्रार्थ्य।**

'ॐ ज्योतीरूपाय दीपाय नमः'। **इति नाम मन्त्रेण गन्धादिभिः सम्पूज्य-'अनया पूजया ज्योतीरूपः प्रत्यक्ष दीपः' प्रीयतां न मम।**

अथ गणपति पूजनम्।

तत्रादौ ध्यानम्—"श्वेताङ्गं श्वेतवस्त्रं सितकुसुमगणैः पूजितं श्वेतगन्धैः क्षीरब्धौ रत्नदीपैः सुरतरुविमले रत्नसिंहासनस्थम्। दोर्भिः पाशाङ्कुशेष्टा भयधृति विशदं चन्द्रमौलिं त्रिनेत्रं ध्यायेच्छान्त्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम्" ॥१॥ **ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणाधिपतये नमः, गणपतिं ध्यायामि।**

ततो हस्ते पुष्पाण्यादाय—"हे हेरम्बत्वमेह्येहि अम्बिकात्र्यम्बकात्मज। सिद्धि बुद्धिपते त्र्यक्ष लक्षलाभ पितुः पितः ॥ १ ॥ नागास्य नागहारत्वं गणराज चतुर्भुज। भूषितः स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः ॥ २ ॥ आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः। इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष मे ॥ ३ ॥"

"ॐ गणानान्त्वा गणपति ठं हवामहे प्रियाणान्त्वा प्रियपतिं ठं हवामहे निधीनान्त्वा निधिपतिं ठं हवामहे व्वसो मम। आहमजानि गर्ब्भधमात्वमजासि गर्ब्भधम्" ॥ ४ ॥ **ॐ भूर्भुवः स्वः सिद्धिबुद्धि-**

---

१ संस्कारमयूखे-'आदौ विनायकः पूज्यश्चाऽन्ते तु कुलदेवता" इति। भविष्यपुराणेऽपि-"देवतादौ यदा मोहाद् गणेशो न च पूज्यते। तदा पूजाफलं हन्ति विघ्नराजो गणाधिपः"॥

सहित महागणाधिपतये नमः, गणपतिमावाहयामि स्थापयामि । इत्यावाह्य–'ॐ गं गणपतये नमः'। इति नाम मन्त्रेण षोडशोपचारैः सम्पूज्य प्रार्थयेत् ।

अथ प्रार्थना ।

"ॐ गजाननम्भूत गणादिसेवितं कपित्थजम्बुफलचारुभक्षणम् । उमासुतं शोक विनाशकारकं नमामि विघ्नेश्वर पादपङ्कजम्" ॥ १ ॥ इति सम्प्रार्थ्य–'अनया पूजया श्रीगणपतिः साङ्गः सपरिवारः प्रीयताम् ।

अथ मातृका पूजनम् ।

तत आग्नेय्यां दिशि पट्टे रक्तवस्त्रं प्रसार्य हरिद्रया षोडश कोष्ठान्कृत्वा तेषु प्रत्येकं गोधूमैः रक्ताक्षतैः पूगीफलैर्वा गौर्य्यादि मातृका निवेश्याः ।

तद्यथा–"ॐ गणेशाय नमः" गणेशमावाहयामि १ "ॐ गौर्य्यै नमः" गौरीमावाहयामि २ "ॐ पद्मायै नमः" पद्मामावाहयामि ३ "ॐ शच्यै नमः" शचीमावाहयामि ४ "ॐ मेधायै नमः"

---

१ आदौ ओंकारः अन्ते च नमः शब्दोच्चारणेन मन्त्रो निष्पन्नो भवति ।

यथा–" ॐ गं गणपतये नमः ।" यथोक्तम्–" ॐ कारादिषु संयुक्तं नमस्कारान्तकीर्तितम् । स्व नाम सर्वसत्वानां मन्त्र इत्यभिधीयते "॥

गारुडे–" प्रणवादि नमोऽन्तं च चतुर्थ्यन्तं च सत्तम । देवतायाः स्वकं नाम मूलमन्त्रः प्रकीर्तितः "॥ प्रणवादि–ओंकारादि, नमोऽन्तं–नमः शब्दान्तम् । एवं भूतं देवतायाः चतुर्थ्यन्तं नाम ।

२ गोभिलस्मृतौ–"कर्मादिषु सर्वेषु मातरः सगणाधिपाः । पूजनीया प्रयत्नेन पूजिताः पूजयन्ति ताः" ॥

मेधामावाहयामि ५ "ॐ सावित्र्यै नमः" सावित्रीमावाहयामि६ "ॐ विजयायै नमः" विजयामावाहयामि ७ "ॐ जयायै नमः" जयामावाहयामि ८ "ॐ देवसेनायै नमः" देवसेनामावाहयामि ९ "ॐ स्वधायै नमः" स्वधामावाहयामि १० "ॐ स्वाहायै नमः" स्वाहामावाहयामि ११ "ॐ मातृभ्यो नमः" मातॄरावाहयामि १२ 'ॐ लोकमातृभ्यो नमः" लोकमातॄरावाहयामि १३ "ॐ हृष्ट्यै नमः" हृष्टिमावाहयामि १४ "ॐ पुष्ट्यै नमः" पुष्टिमावाहयामि १५ "ॐ तुष्ट्यै नमः" तुष्टिमावाहयामि १६ "ॐ आत्मनः कुलदेवतायै नमः" आत्मनः कुलदेवतामावाहयामि १७ इत्यावाह्य– "ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु । विश्वे देवा स इह मादयन्तामो३म्प्रतिष्ठ" ॥ १ ॥

ॐ भूर्भुवः स्वः गणपतिसहिता गौर्यादि मातरः सुप्रतिष्ठिता वरदा भवन्त्विति प्रतिष्ठाप्य–"ॐ गौर्यादिषोडशमातृकाभ्यो नमः" । इति नाम मन्त्रेण षोडशोपचारैः सम्पूज्य प्रार्थयेत् ।

अथ प्रार्थना ।

"ॐ आयुरारोग्यमैश्वर्यं ददध्वं मातरो मम । निर्विघ्नं सर्वकार्येषु कुरुध्वं सगणाधिपाः" ॥ १ ॥ इति सम्प्रार्थ्य–अनयापूजया श्रीगणपतिसहित गौर्यादि षोडशमातरः प्रीयन्तां न मम ।

अथ प्रार्थना ।

ततः साञ्जलिः–"ॐ यदङ्गत्वेन भो देव्यः पूजिता विधिमार्गतः । कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम्" ॥ १ ॥ इति सम्प्रार्थ्य– 'अनया पूजया श्र्यादि सप्त घृतमातरः प्रीयन्तां न मम ।

अथ नवग्रह पूजनम् ।

तत्रादौ हस्ते पुष्पाक्षतानादाय ग्रहमण्डलमध्ये रक्तपुष्पाक्षतैः सूर्यमावाहयेत् ।

तद्यथा—"ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् " ॥ १ ॥ ॐ भूर्भुवः स्वः सूर्य इहागच्छ इहतिष्ठ सूर्याय नमः, सूर्यमावाहयामि ।

तत आग्नेय्यां दिशि सोमम्—"ॐ इमं देवाऽ असपत्नꣳ सुवध्वम्महते क्षत्राय महते ज्यैष्ठ्याय महते ज्जानराज्यायेन्द्रस्येन्द्रियाय । इममुमुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएषवो मी राजा सोमोस्माकम्ब्राह्मणाना ꣳ राजा " ॥ २ ॥ ॐ भू० चन्द्र इहागच्छ० चन्द्राय नमः ।

ततो दक्षिणस्यां दिशि भौमम्—"ॐ अग्निर्मूर्द्धादिवꣳ ककुत्पतिः पृथिव्याऽअयम् । अपा ꣳ रेता ꣳ सिजिन्वति " ॥ ३ ॥ ॐ भू० भौम इहा० भौमाय नमः ।

तत ऐशान्यां दिशि बुधम्—"ॐ उद्बुध्य स्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सꣳ सृजेथा मयञ्च । अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत " ॥४॥ ॐ भू० बुध इहागच्छ० बुधायनमः ।

---

१ उत्पलपरिमले—"कार्यारम्भेषु सर्वेषु प्रतिष्ठास्वध्वरेषु च । नववेश्म प्रवेशे च गर्भाधानादि कर्मसु । आरोग्य स्नानसमये संक्रान्तौ रोगसम्भवे । अभिचारे च यः कुर्याद् ग्रहपूजां विधानतः । सोऽभीष्टफलमाप्नोति निर्विघ्नेन न संशयः" ॥

तत उत्तरस्यां दिशि बृहस्पतिम्–" ॐ बृहस्पते ऽअति यदर्य्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् " ॥ ५ ॥ **ॐ भू० बृहस्पते इहागच्छ० बृहस्पतये नमः ।**

ततः पूर्वस्यां दिशि शुक्रम्–" ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः । ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोऽमृतम्मधु " ॥ ६ ॥ **ॐ भू० शुक्र इहा० शुक्राय नमः ।**

ततः पश्चिमायां दिशि शनैश्चरम्–" ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः " ॥ ७ ॥ **ॐ भू० शनैश्चर इहा० शनैश्चराय नमः ।**

ततो नैर्ऋत्यांदिशिराहुम्–" ॐ कया न श्चित्रऽआभुवदूती सदावृधः सखा । कया शचिष्ठयावृता " ॥ ८ ॥ **ॐ भू० राहो इहा० राहवे नमः ।**

ततो वायव्यां दिशिकेतुम्–" ॐ केतुं कृण्वन्न केतवेपेशोमर्य्याऽअपेशसे । समुषद्भिरजायथाः " ॥ ९ ॥ **ॐ भूर्भुवः स्वः केतो इहागच्छ इहतिष्ठ केतवे नमः ।**

इत्यावाह्य–" ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमंतनोत्वरिष्टं यज्ञꣳ समिमं दधातु । विश्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ " ॥ ॥ १ ॥ **ॐ सूर्यादिग्रहेभ्यो नमः, सुप्रतिष्ठिता वरदा भवतेति प्रतिष्ठाप्य**–" ॐ सूर्यादिग्रहेभ्यो नमः " । **इति नाम मन्त्रेण षोडशोपचारैः सम्पूज्य प्रार्थयेत् ।**

अथ प्रार्थना ।

ब्रह्मा मुरारि स्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च । गुरुश्च शुक्रः शनि राहु केतवः सर्वे ग्रहाः शान्ति करा भवन्तु " ॥ १ ॥ इति सम्प्रार्थ्य–'अनया पूजया सूर्य्यादिग्रहाः प्रीयन्तां न मम ।

अथ कलश पूजनम् ।

तत्रैशान्यां गोधूमादिधान्यपुञ्जेष्वव्रणं ताम्रकलशं मृण्मयकलशं वा महिद्यौरित्यादिमन्त्रैः प्रतिष्ठाप्य पूजयेत् ।

ततो हस्ते पुष्पाक्षतानादाय–"ॐ तत्त्वायामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो व्वरुणेह बोध्युरुशꣳस मान ऽआयुः प्रमोषीः" ॥ १ ॥ ॐ अस्मिन्कलशे भगवन् वरुण इहागच्छ इह तिष्ठेति वरुणमावाह्य–'ॐ अपाम्पति वरुणाय नमः" । इति नाममन्त्रेण षोडशोपचारैः सम्पूजयेत् । ततो दक्षिणहस्तस्यानामिकया कलशमालभ्याभिमंत्रयेत् ।

अथाऽभिमन्त्रणम् ।

"ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ १ ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ २ ॥ अङ्गैश्च सहिताः सर्वे कलशन्तु समाश्रिताः" ॥ ३ ॥ इत्यभिमंत्र्य प्रार्थयेत् ।

अथ प्रार्थना ।

" ॐ देवदानव सम्वादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ ! विधृतो विष्णुना स्वयम् ॥ १ ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे

त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ २ ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवोरुद्राः विश्वेदेवाः सपैत्रिकाः ॥३॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः । त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव । सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा" ॥ ४ ॥ ॐ प्रसन्नो भव । ॐ वरदो भव । इति सम्प्रार्थ्य--अनया पूजया अपाम्पति वरुणः साङ्गः सपरिवारः प्रीयतां न मम ।

अथ शालग्राम पूजनम् ।

ततो रजताद्दिपात्रे चन्दनादिनाऽष्टदलं कृत्वा तुलसीदलं च निधाय, तदुपरि शालग्रामशिलां संस्थाप्य पुरुषसूक्तेनाऽभिषेकं कुर्यात् ।

ततः पञ्चामृतेन—" ॐ पञ्चनद्यः सरस्वतीमपियन्ति सस्रोतसः । सरस्वती तु पञ्चधासो देशे भवत्सरित्" ॥ १ ॥ इति मन्त्रेण संस्नाप्य पुनः शुद्धोदकेन स्नापयित्वा शुद्धवस्त्रेण सम्प्रोञ्छ्य सिंहासने स्थापयेत् ।

पुनरुपवीतं " ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः" ॥ ॥ १ ॥ इति मन्त्रेण समर्प्य गन्धं पुष्पाणि तुलसीदलानि

---

१ आ० सूत्रावलौ–', स्नानान्ते चार्पयेद्वस्त्रं देवानां प्रीतये सदा । ब्रह्मसूत्रं च दातव्यं पूजाफलमभीप्सुना"

२ पुष्पार्पणप्रकारः कालिका पुराणे–" पत्रं वा यदि वा पुष्पं फलं वापि तथैव च । केशवार्थे शिवार्थे वा यथोत्पन्नं तथार्पयेत् ॥ मध्यमाऽनामिकामध्ये पुष्पं सङ्गृह्य पूजयेत् । अङ्गुष्ठ तर्जनीभ्यांतु निर्माल्यमपनोदयेत्"

च समर्प्य, धूपं दीपं च समर्प्य नैवेद्यं देवदक्षिणे निधाय ग्रासमुद्रयाऽर्पयेत ।

तद्यथा—"ॐ प्राणायस्वाहा" । "ॐ अपानाय स्वाहा" । 'व्यानाय स्वाहा' । 'ॐ उदानाय स्वाहा' । 'ॐ समानाय स्वाहा' । 'ॐ नाभ्याऽआसीदन्तरिक्षꣳ शीर्ष्णोद्यौः समवर्तत । पद्भ्याम्भूमिर्द्दिशः श्रोत्रात्तथालोकाꣳ२ऽअकल्पयन्" ॥ **इति समर्प्य नैवेद्यमध्ये पानीयं** दत्वा पुनर्नैवेद्यमर्पयित्वोत्तरापोशनं हस्तप्रक्षालनं मुखप्रक्षालनं आचमनीयं करोद्वर्तनार्थे चन्दनं च समर्प्य ऋतुफलं ताम्बूलं दक्षिणां च समर्प्य प्रार्थयेत् ।

अथ प्रार्थना ।

"ॐ नमोस्त्वनन्ताय सहस्रमूर्त्तये सहस्रपादाक्षि शिरोरुवाहवे । सहस्र नाम्ने पुरुष शाश्वते सहस्रकोटियुगधारिणे नमः" ॥ १ ॥ **इति पठित्वा प्रणमेत् ।**

अथ सप्तर्षि स्थापनं पूजनञ्च ।

तत्रादौ सव्यहस्तधृताक्षतेभ्यः दक्ष हस्तेन अक्षतानादाय कश्यपादि ऋषीनावाहयेत)

---

१ नैवेद्य स्थापन क्रमो गौत्तमीये—"नैवेद्यं दक्षिणेभागे पुरतो वा न पृष्ठतः । भक्ष्यं भोज्यं च लेह्यं च पेयं चोष्यं च पञ्चमम् । सर्वत्र चैव नैवेद्यमाराध्यास्मै निवेदयेत्" ॥

अन्यत्र—"दक्षिण न्तु परित्यज्य वामे चैव निधापयेत् । अभोज्यं तद्भवेदन्नं पानीयं च सुरोपमम्" ॥

२ पुजनार्हा ऋषयः—"कश्यपोऽथ भरद्वाजो गौतमश्चात्रिरेव च । जमदग्निर्वसिष्ठश्च विश्वामित्रो महामनाः ॥ एते देवर्षयः सप्त साध्वी चैवाप्यरुन्धती । पूजनीया विशेषेण वेदोत्सर्जन कर्मणि" ॥

स्मृतिरत्ने—"कुर्यात्सप्त ऋषिभ्यश्च स्थापनं च पुथक् पृथक् । प्रतिष्ठावाहानं चैव कालज्ञानं भवेत्ततः" ॥

तत्रक्रमः–" ॐ भूर्भुवः स्वः कश्यपाय नमः कश्यपम् आवाहयामि स्थापयामि । भो कश्यप इहागच्छ इह तिष्ठ पूजां गृहाण मम सम्मुखः सुप्रसन्नो वरदो भव" ॥ १ ॥ इत्यक्षत प्रक्षेपपूर्वकं दर्भमयं कश्यपं स्थापयेत् ।

(एवं सर्वत्र)–" ॐ भरद्वाजाय नमः भरद्वाजम् आवाहयामि स्थापयामि । भो भरद्वाज इहागच्छ इहतिष्ठ० " ॥ २ ॥

" ॐ भूर्भुवः स्वः गौतमाय नमः गौतमम् आवाहयामि स्थापयामि । भो गौतम इहागच्छ इहतिष्ठ० " ॥ ३ ॥

" ॐ भूर्भुवः स्वः अत्रये नमः अत्रिमावाहयामि स्थापयामि । भो अत्रये इहागच्छ इहतिष्ठ० " ॥ ४ ॥

" ॐ भूर्भुवः स्वः जमदग्नये नमः जमदग्निमावाहयामि स्थापयामि । भो जमदग्नये इहा इहागच्छ इहतिष्ठ० " ॥ ५ ॥

' ॐ भूर्भुवः स्वः वशिष्ठाय नमः वशिष्ठमावाहयामि स्थापयामि । भो वशिष्ठ इहागच्छ इहतिष्ठ० " ॥ ६ ॥

" ॐ भूर्भुवःस्वःविश्वामित्राय नमः विश्वामित्रमावाहयामि स्थापयामि । भो विश्वामित्र इहागच्छ इहतिष्ठ० " ॥ ७ ॥

" ॐ भूर्भुवः स्वः अरुन्धत्यै नमः अरुन्धतीमावाहयामि स्थापयामि । भो अरुन्धति इहागच्छ इहतिष्ठ० " पूजां गृहाण मम सम्मुखा सुप्रसन्ना वरदा भव " ॥ ८ ॥

इत्यावाह्य पुष्पाक्षतान् गृहीत्वा प्रतिष्ठापयेत् ।

" ॐ मनोजूतिर्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंयज्ञठं समिमन्दधातु । विश्वेदेवासऽइहमादयन्तामों ३म्प्रतिष्ठ ॥ १ ॥ एषवै-प्प्रतिष्ठानामयज्ञोयत्रैतेन यज्ञेनयजन्ते सर्वमेवप्प्रतिष्ठितम्भवति " ॥ २ ॥ ॐ अरुन्धती सहिताः सप्तर्षयः सुप्रतिष्ठिता वरदा वरदा भवन्तु । **इति करस्थित पुष्पाक्षतान् ऋष्युपरि निक्षिपेत् प्रार्थयेच्च ।**

अथ ऋषि प्रार्थना ।

"ॐइमावेव गौतमभरद्वाजावयमेव गौतगोऽयं भारद्वाजऽइमावेव विश्वामित्रजमदग्नीऽअयमेव विश्वामित्रोऽयं जमदग्निरिमावेव वसिष्ठकश्यपा वयमेव वसिष्ठोऽयं कश्यपो वागेवात्रिर्वाचाह्यन्नमद्यते तिर्हवैनामैतद्यदत्रिरिति सर्वस्यात्ता भवति सर्वस्याऽन्नं भवति यऽएवंवेद" ॥ इति सम्प्रार्थ्य ध्यायेत् ।

अथ ध्यानम् ।

"ॐ सप्तऽऋषय ऽ प्रतिहिताऽ शरीरे सप्त रक्षन्ति सदमप्रमादम् । सप्तापऽ स्वपतो लोकमीयुस्तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ ॥१॥ ॐ इदँविष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पा ँ सुरे स्वाहा ॥ २ ॥ ॐ सहस्रशीर्षा पुरुषः सहस्राक्षऽ सहस्रपात् । सभूमि ँ सर्व्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ ३ ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहित कश्यपादि सप्तर्षिभ्यो नमः ध्यानं समर्पयामि ॥ १ ॥

"ॐ पुरुष एवेदँ सर्व्वंयद्भूतं यच्चभाव्यम् । उतामृतत्वस्येशानोयदन्नेनातिरोहति" ॥ ॐ भूर्भुव अरुन्धतीसहित सप्तर्षिभ्यो नमः आसनार्थे पुष्पाणि समर्पयामि ॥ २ ॥

"ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः । पादोस्य विश्वा भूतानित्रिपादस्यामृतन्दिवि" ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहित सप्तर्षिभ्यो नमः पाद्यं समर्पयामि ॥ ३ ॥

" ॐ त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः। ततो विष्वङ्व्यक्रामत्साशनानशने अभि " ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहित सप्तर्षिभ्यो नमः अर्घ्यं समर्पयामि ॥ ४ ॥

" ॐ ततो विराडजायत विराजो अधिपूरुषः। सजातो अत्यरिच्यत पश्चाद्भूमिमथोपुरः " ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहित सप्तर्षिभ्यो नमः आचमनीयं समर्पयामि ५ ॥

" ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम्। पशूँस्ताँश्चक्रे वायव्यानारण्याग्राम्याश्चये " ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहित सप्तर्षिभ्यो नमः स्नानं समर्पयामि ॥ ६ ॥

" ॐ पञ्चनद्यः सरस्वती मपियन्ति सस्रोतसः। सरस्वती तु पञ्चधासो देशेऽभवत्सरित् ॐ भूर्भुवः स्वः अरुन्धती सहित सप्तर्षिभ्यो नमः पञ्चामृतस्नानं समर्पयामि ॥ ७ ॥

पुनः शुद्धोदकस्नानं समर्पयामि।

" ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् "॥ ॐ भूर्भुवः स्वः अरुन्धतीसहित सप्तर्षिभ्योनमः गन्धोदकस्नानं सम० ॥ ८ ॥

ततः स्नानान्ते सहस्रशीर्षेति षोडशभिर्ऋग्भिरभिषेकं कुर्यात्।

---

१ धन्वतरि –" गव्यमाज्यं दधि क्षीरं माक्षिकं शर्करान्वितम्। एकत्र मिलितं ज्ञेयं दिव्यं पञ्चामृतं परम् "॥

ततः–'ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि यज्ञिरे । छन्दाᳩसि यज्ञिरे तस्माद्यजुस्तस्मादजायत "॥ ॐ भूर्भुवः स्वः अरुन्धती-सहित सप्तर्षिभ्यो नमः वस्त्रोपवस्त्रं समर्पयामि ॥ ९ ॥

वस्त्रान्ते आचमनीयं समर्पयामि ।[1]

" ॐ तस्मादश्वाऽअजायन्तयेकेचोभयादतः । गावोहयज्ञिरे तस्मात्तस्माज्जाताऽअजावयः "॥ ॐ भूर्भुवः स्वः अरुन्धतीसहित सप्तर्षिभ्यो नमः यज्ञोपवीतानि समर्पयामि ॥ १० ॥

यज्ञोपवीतान्ते आचमनीयं समर्पयामि ।

" ॐ तंयज्ञम्बर्हिषिप्रौक्षन्पुरुषञ्जातमग्रतः । तेन देवाऽअयजन्तसाध्याऽऋषयश्चये "॥ ॐभूर्भुवः स्वः अरुन्धतीसहित सप्तर्षिभ्यो नमः गन्धं[2] समर्पयामि ॥ ११ ॥

"अक्षन्नमी मदन्तह्यवप्रिया ऽअधूषत । अस्तोषत स्वभानवो विप्रानविष्ठयामतीयोयाजान्विन्द्रते हरी" ॥ ॐ भूर्भुवः स्वः अरुन्धती सहित सप्तर्षिभ्यो नमः अक्षतान् सम० ॥ १२ ॥

ॐ अहिरिव भोगैः पर्य्येति वाहुंज्ज्यायाहेतिम्परिबाधमानः । हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमाᳩसम्परिपातु विश्वतः "॥ ॐ भूर्भुवः स्वः अरुन्धती सहित सप्तर्षिभ्यो नमः हरिद्राकुंकुमादिद्रव्याणि समर्पयामि ॥ १३ ॥

---

१ आ० का०–" स्नाने वस्त्रे च नैवेद्य दद्यादाचमनं तथा "।

२ देवानां गन्धं नित्यमनामिकयाऽनुलेपयेत् ।

उक्तं च ब्राह्मे-"अनामिकया देवानामृषीणां च तथैव च । गन्धानुलेपनं कार्यं प्रयत्नेन विशेषतः ॥ पितॄणामर्पयेद्गन्धं तर्जन्या च सदैव हि । तथैवाऽङ्गुष्ठमध्याभ्यां धार्यो गन्धः स्वयं बुधैः " ॥

"ॐ यत्पुरुषं व्यदधुः कति धाव्यकल्पयन् । मुखं किमस्यासीत्किम्बाहू-किमूरूपादाऽउच्येते" ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहित सप्तर्षिभ्यो नमः पुष्पाणि समर्पयामि ॥ १४ ॥

तुलसीदलानि बिल्वपत्राणि कमलानि च ऋषिभ्यो विशेषतः समर्पयेत् ।

"ॐ ब्राह्मणोस्यमुखमासीद्बाहूराजन्य ÷ कृतः । ऊरूतदस्य यद्वैश्य ÷ पद्भ्या ँ शूद्रोऽअजायत" ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहित सप्तर्षिभ्यो नमः धूपमाघ्रापयामि ॥ १५ ॥

"ॐ चन्द्रमामनसोजातश्चक्षोः सूर्य्योऽअजायत । श्रोत्राद्वायुश्चप्राणश्च मुखादग्निरजायत" ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहित सप्तर्षिभ्यो नमः दीपं दर्शयामि ॥ १६ ॥

(दीपान्ते हस्तप्रक्षालनम् ।

"ॐ नाभ्याऽआसीदन्तरिक्षꣳ शीर्ष्णोद्यौः समवर्त्तत । पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथालोकाँ२ ऽअकल्पयन्" ॥ ॐ भूर्भुवः स्वः अरुन्धती सहित सप्तर्षिभ्यो नमः नैवेद्यं समर्पयामि ॥ १७ ॥

(नैवेद्यान्ते आचमनीयं समर्पयामि ।

"ॐ याः फलिनीर्य्याऽअफलाऽअपुष्पायाश्च पुष्पिणी ÷ । बृहस्पति प्रसूतास्तानो मुञ्चन्त्वꣳ हस ÷" ॥ भूर्भुवः स्वः अरुन्धती सहित सप्तर्षिभ्यो नमः ऋतुफलानि समर्पयामि ॥ १८ ॥

---

१ धूपादिस्थापन क्रमः रुद्रयामले—"दीपं दक्षिणतो दद्यात्पुरतो वा न वामतः । वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे" ॥

" ॐ यत्पुरुषेणहविषादेवा यज्ञमतन्वत । व्वसन्तोस्यासीदाज्ज्यङ्ग्रीष्मऽइध्मऽशरद्धविः " ॥ **ॐ भूर्भुवः स्वः अरुन्धतीसहित सप्तर्षिभ्यो नमः ताम्बूलं समर्पयामि ॥ १९ ॥**

" ॐ हिरण्यगर्भऽसमवर्त्तताग्रे भूतस्य जातऽ पतिरेकऽआसीत् । सदाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषाव्विधेम "॥ **ॐ भूर्भुवः स्वः अरुन्धतीसहित सप्तर्षिभ्यो नमः दक्षिणां समर्पयामि ॥२०॥**

ततः कर्पूरेण नीराजनं कुर्यात्—" ॐ इद ꣳ हविः प्प्रजननम्मेऽअस्तु दशवीर ꣳ सर्व्वगण ꣳ स्वस्तये । आत्मसनि प्प्रजासनि पशुसनि लोकसन्न्यभयसनि । अग्निः प्रजाम्बहुलाम्मे करोत्वन्नं पयोरेतोऽअस्मासु धत्त "॥ **ॐ भूर्भुवः स्वः अरुन्धतीसहित सप्तर्षिभ्यो नमः कर्पूरार्तिक्यं समर्पयामि ॥ २१ ॥**

ततो मन्त्र पुष्पयुक्ताऽञ्जलिं दद्यात्[1]—" शरणागतदीनार्त परित्राणपरायणाः । रक्षन्तु मुनयः सर्वे मामद्य शरणागतम् । सप्तर्षयः शुभाः श्रेष्ठाः सर्वेषां च शुभप्रदाः । पुष्पाञ्जलिं मया दत्तं गृह्णन्तु मुनिसत्तमाः "॥

" ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् । तेहनाकम्महिमानः सचन्तयत्र पूर्व्वे साध्याः सन्ति देवाः " ॥ **ॐ भूर्भुवः स्वः अरुन्धती सहित सप्तर्षिभ्यो नमः मन्त्र पुष्पाञ्जलिं समर्पयामि ॥ २२ ॥**

---

१ " नाना सुगन्ध पुष्पाणि यथा कालोद्भवानि च । पुष्पाञ्जलिः शुभादेया देवताप्रीतये सदा "॥ इति आह्निक सूत्रावलौ ।

"यानि कानि च पापानि जन्मान्तरकृतानि च। तानि तानि विनश्यन्ति प्रदक्षिण पदे पदे"॥

"ॐ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधः कृताः। देवा यद्यज्ञन्तन्वानाऽअवध्नन्पुरुषम्पशुम्"॥ **ॐ भूर्भुवः स्वः अरुन्धतीसहित सप्तर्षिभ्यो नमः प्रदक्षिणां समर्पयामि॥ २३॥**

अथ प्रार्थना।

"ॐ मन्त्रहीनं क्रियाहीनं भक्तिहीनं मुनीश्वराः यत्पूजितं मया सर्वं परिपूर्ण तदस्तु मे"॥ **ॐ भूर्भुवः स्वः अरुन्धतीसहित सप्तर्षिभ्यो नमः नमस्कारं समर्पयामि॥ २४॥**

अनेन मया वेदोत्सर्जनाङ्गत्वेन कृतेन ध्यानावाहनादि षोडशोपचारैः पूजनेन अरुन्धतीसहित कश्यपादि सप्तर्षयः प्रीयन्तां न मम!

ॐ तत्सद्ब्रह्मार्पणमस्तु।

अथ स्वपितृभ्यो यज्ञोपवीतदानम्।

तत्रादौ सर्वे प्राचीनावीतिनो (**अपसव्यो भूत्वा**) दक्षिणाभिमुखाः स्वपुरतो यज्ञोपवीतानि निधाय कुशोदकं गृहीत्वा—**देशकालौ सङ्कीर्त्य** अमुक गोत्रः अमुक शर्माहं (**गुप्तोऽहं वा**) "अद्यामुक गोत्रेभ्यः अस्मत्पितृपितामह प्रपितामहेभ्योऽमुकाऽमुक शर्मभ्यः (**गुप्तेभ्यः**) **तथा द्वितीयगोत्रेभ्यः** अस्मन्मातामह—प्रमातामह—वृद्धप्रमातामहेभ्योऽमुकाऽमुकशर्मभ्यः, **गुप्तेभ्यः**) "**तथाऽन्येभ्यः** कव्यवाडनलादि दिव्य पितृभ्यश्चइमानि यज्ञोपवीतानि स्वधा सम्पद्यन्ताम्"। **इति ऋष्युपरि यज्ञोपवीतानि समर्पयेत्**।

---

१ अत्र यज्ञोपवीतदानमपसव्येन—तथा च स्मृतिरत्ने—"पूजोपवीतिना दानं प्राचीनावीति पूर्वकम्"॥

(जीवत्पितृकैरपि पितुः पित्रादिभ्यो मातामहादिभ्यश्च यज्ञोपवीतानि देयानि)

ततः सव्यं कृत्वा सर्वान् ब्राह्मणान् गन्धादिना सम्पूज्य तेभ्यो यज्ञोपवीतानि दत्त्वा पश्चात्सर्वैः सह स्वयमपि धारयेत् ।

अथ यज्ञोपवीत धारण प्रयोगः ।

तत्रादौ आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य– अमुक गोत्रः अमुकशर्माहं (**वर्मा गुप्तोऽहं वा**) " मम श्रौतस्मार्तकर्मानुष्ठानसिद्धिद्वारा श्रीपरमेश्वर प्रीत्यर्थं नूतनयज्ञोपवीतधारणं करिष्ये " ।

" तदङ्गत्वेनादौ नूतन यज्ञोपवीतमार्जनाऽभिमन्त्रणं च करिष्ये " । **इति सङ्कल्प्य ॐ इदम्विष्णुरित्यादिमन्त्रैरुपवीतानि प्रक्षालयेत ।**

तत्रमंत्रः–' ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पा ᳪ सुरे स्वाहा " ॥ १ ॥

" ॐ आपो हिष्ठा मयोभुवस्तानऽऊर्ज्जे दधातन । महेरणाय चक्षसे ॥ ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः ॥ ॐ तस्माऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः "

॥ २ ॥ इति यज्ञोपवीतानि प्रक्षाल्याऽनन्तरं दक्षकृत्वो गायत्र्याभिमन्त्र्य पुष्पाक्षतानादाय तन्तुषु देवतानामावाहनं कुर्यात् ।

तद्यथा-प्रथमतन्तौ–" ॐ काराय नमः **ॐ कारमावाहयामि** " ॥ १ ॥ **द्वितीयतन्तौ**–" ॐ अग्नये नमः **अग्निमावाह-**

---

[१] वायुपुराणे–" उपाकर्मणि विप्रेभ्यो दद्याद्यज्ञोपवीतकम् । आयुष्मान् जायते तेन कर्मणा मानवो भुवि " ॥

यामि" ॥ २ ॥ तृतीयतन्तौ–"ॐ सर्पेभ्यो नमः सर्पानावाहयामि" ॥ ३ ॥ चतुर्थतन्तौ–"ॐ सोमाय नमः सोममावाहयामि" ॥ ४ ॥ पञ्चमतन्तौ–"ॐ पितृभ्यो नमः पितॄनावाहयामि" ॥ ५ ॥ षष्ठतन्तौ–"ॐ प्रजापतये नमः प्रजापतिमावाहयामि" ॥ ६ ॥ सप्तमतन्तौ–"ॐ अनिलाय नमः अनिलमावाहयामि" ॥ ७ ॥ अष्टमतन्तौ[1]–"ॐ सूर्याय[2] नमः सूर्यमावाहयामि" ॥ ८ ॥ नवम तन्तौ–"ॐ विश्वेभ्यो देवेभ्यो नमः विश्वान्देवानावाहयामि" ॥ ९ ॥

अथ ग्रन्थिदेवतानामावाहनम्।

ततः प्रथम ग्रन्थिमध्ये–"ॐ ब्रह्मणे नमः ब्रह्माणमावाहयामि' ॥ १ ॥

द्वितीय ग्रन्थिमध्ये–"ॐ विष्णवेनमः विष्णुमावाहयामि" ॥२॥ तृतीयग्रन्थिमध्ये[3]–"ॐ रुद्राय नमः रुद्रमावाहयामि" ॥ ३ ॥ इति यज्ञोपवीतानामुपरि पुष्पाक्षतान्निक्षिपेत।

---

१ अष्टमतन्तौ–यममावाहयामीत्यपि पाठः।

२ आ० सूत्रावलौ–"अष्टमे सूर्य एव च"। इति।

३ "त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा"।

सामवेदीय छान्दोग्य सूत्र परिशिष्टेऽपि–"ब्रह्मणोपादितं सूत्रं विष्णुना त्रिगुणी कृतम्। कृतो ग्रन्थिस्त्रिनेत्रेण गायत्र्या चाभिमन्त्रितम्" ॥

"तिथिर्वारञ्च नक्षत्रं तत्ववेदगुणान्वितम्। कालत्रयञ्च मासश्च ब्रह्मसूत्रं हि षण्णवम्" ॥ (तिथि १५, वार ७, नक्षत्र २७, तत्त्व २५, वेद ४, गुण ३ मास १२, काल ३, सर्वयोग ९६ चव्वे)

मतान्तरेतु- चतुर्षु वेदेषु अशीति सहस्र कर्मणो मन्त्राः सन्ति। षोडश-सहस्रोपासनाकाण्डस्य मन्त्राः, एषामेव मन्त्राणां षण्णवति ९६ आवर्ताः (चव्वाः) सन्ति, देवर्षिपितृ ऋणस्मारकास्त्रय ग्रन्थयो विद्यन्ते।

ततः—'ॐप्रणवाद्यावाहितदेवताभ्यो नमः' यथा स्थानमहं न्यसामि । इत्यावाह्य षोडशोपचारैः सम्पूज्य ध्यायेत् ।

अथ ध्यानम् ।

ततः साञ्जलिः—"ॐ प्रजापतेर्यत्सहजं पवित्रं कार्पाससूत्रोद्भवब्रह्मसूत्रम् । ब्रह्मत्वसिद्धयै च यशः प्रकाशं जपस्य सिद्धिं कुरु ब्रह्मसूत्रम् ॥ १ ॥

"ॐ युवासुवासाः परिवीत आगात्स उश्रेयान्भवति जायमानः । तन्धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः" ॥ २ ॥ इति ध्यात्वा यज्ञोपवीत धारणं कुर्यात् ।

अथ यज्ञोपवीत धारणम् ।

ततो नूतन यज्ञोपवीतं वामहस्ते गृहीत्वा दक्षिणहस्तेनाऽऽच्छाद्य दशकृत्वो गायत्र्याभिमन्त्र्य सूर्याय दर्शयित्वा हस्ते जलमादाय—'यज्ञोपवीतमिति मन्त्रस्य परमेष्ठी ऋषिः लिङ्गोक्ता देवता त्रिष्टुप्छन्दः यज्ञोपवीतधारणे विनियोगः" । इति क्षिपेत् ।

ततो वक्ष्यमाणमन्त्रं पठन् यज्ञोपवीतं पृथक् पृथक् धारयेत् ।

तत्रमंत्रः—"ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीते नोपनह्यामि " इति ।

---

१ "कृते पद्ममयं सूत्रं त्रेतायां कनकोद्भवम् ।
द्वापरे राजतं प्रोक्तं कलौ कार्पाससम्भवम्" ॥

२ यज्ञोपवीतधारण प्रकारः मतान्तरे—"सूतके मृतके चैव गते मास चतुष्टये । नव यज्ञोपवीतानि धृत्वा जीर्णानि संत्यजेत् " ॥

संग्रहेच—" उपाकर्मणि चोत्सर्गे गते मासचतुष्टये । नव यज्ञोपवीतानि धृत्वा पूर्वाणि संत्यजेत् "—

"प्रतियज्ञोपवीतधारणान्ते आचमनम्"।

ततः–"ॐ एतावद्दिनपर्यन्तं ब्रह्मत्वं धारितं मया । जीर्णत्वात्त्वत्परित्यागो गच्छ सूत्र ! यथा सुखम्" । इति मन्त्रेण जीर्णयज्ञोपवीतं शिरोमार्गेण निःसार्य भूमौ त्यजेत् । पश्चाद्यथाशक्ति गायत्रीं जपेत् ।

अथाऽर्पणम् ।

कृतेनानेन नवयज्ञोपवीत धारणाङ्गत्वेन यथाशक्ति गायत्री जप कर्मणा श्रीसविता देवता प्रीयतां न मम । ॐ तत्सद् ब्रह्मार्पणमस्तु । इति यज्ञोपवीत धारण प्रयोगः ।

अन्यच्च–"यज्ञोपवीतं यदि जीर्णभूतं वेदान्त नित्यं परब्रह्मसूत्रम् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं च विसर्जनीयम् ॥ यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि । तृतीयमुत्तरीयार्थं वस्त्राभावे चतुर्थकम् । नष्टे भ्रष्टे नवं मन्त्राद् धृत्वा भ्रष्टं जले क्षिपेत् । स्तनादूर्ध्वमधोनाभेर्न धार्यं तत्कथञ्चन ॥ पृष्ठवंशे च नाभ्याञ्च धृतं तद्विन्दते कटिम् ॥ तद्धार्यमुपवीतं स्यान्नातिलम्बं न चोच्छ्रितम् । वामस्कन्धे कृतं नाभिहृत्पृष्ठवंशयोर्धृतम्" ॥ इति वायुपुराणे ।

स्मृत्यन्तरे–"नाभेरूर्ध्वमनायुष्यमधोनाभेस्तपः क्षयः । तस्मान्नाभिसमं कुर्यादुपवीतं विचक्षणः" ॥

आ० सूत्रावलौ–"विना यज्ञोपवीतेन विण्मूत्रोत्सर्गंकृद्यदि । उपवासद्वयं कृत्वा दानैर्होमैस्तु शुद्ध्यति" ॥ इति ।

"विना यज्ञोपवीतेन तोयं यः पिबति द्विजः । उपवासेन चैकेन पञ्चगव्येन शुद्ध्यति" ॥

"पतितं त्रुटितं वापि ब्रह्मसूत्रं यदा भवेत् । नूतनं धारयेद्विप्रः स्नानसंकल्प पूर्वकम्" ॥

वायुपुराणे–"उपवीतमलंकारं स्रजं करकमेव च । उपानहौ च वासश्च धृतमन्यैर्न धारयेत्" ॥

अथोत्सर्गाङ्ग भूत मृषितर्पणम् ।

तत्रादौ आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य-"ममात्मन एतत्स्थूलशरीरावरोधेन सुकृतोदय फलप्राप्तिपूर्वकं छन्दसां क्वचिदनध्यायादिकाले पठनादनधिकारिभिः शूद्रादिभिः श्रूयमाणत्वेन कृतस्याऽध्ययनस्य दोषनिरासार्थमुत्सर्गाङ्गभूतं तर्पणं करिष्ये"। इति सङ्कल्प्य दक्षिणं जान्वाच्येशानाभिमुखः सव्येन प्रागग्रैर्दर्भैर्देवतीर्थेन देवतर्पणं कुर्यात् ।

ततः साञ्जलिः-"ॐ विश्वे देवासऽआगतश्रृणुतामऽइमठंहवम् । एदम्बर्हिर्निषीदत" ॥ १ ॥

"विश्वेदेवाःश्रृणुतेमठं हवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ । येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन्न्बर्हिषिमादयध्वम्" ॥ २ ॥ इति देवानावाह्य तर्पयेत् ।

तद्यथा-"ॐ देवास्तृप्यन्ताम्"। "ॐ छन्दासि तृप्यन्ताम्"। "ॐ वेदास्तृप्यन्ताम्"। "ॐ ऋषयस्तृप्यन्ताम्"। "ॐ पुराणाचार्यास्तृप्यन्ताम्"। "ॐ गन्धर्वास्तृप्यन्ताम्"। "ॐ इतराचार्यास्तृप्यन्ताम्"। "ॐ संवत्सरास्तृप्यन्ताम्"।

ततो मृतपितृको वामं जान्वाच्य दक्षिणाभिमुखोऽपसव्येन तिलमिश्रितं जलमञ्जलौ गृहीत्वा-"ॐ अद्यामुक गोत्राः अस्मत्पितरः अमुकशर्माणो वसुरूपास्तृप्यध्वं स्वधा नमः"। ३ ॥ "ॐ अमुकगोत्राः अस्मत्पितामहाः अमुकशर्माणो रुद्ररूपास्तृप्यध्वं स्वधानमः।" ॥ ३ ॥ "ॐ अमुकगोत्राः अस्मत्प्रपितामहाः अमुकशर्माण आदित्यरूपास्तृप्यध्वं स्वधा नमः" ॥ ३ ॥ इति स्वपितॄँस्तर्पयेत् ।

"ॐ अद्याऽमुकगोत्राः अस्मन्मातृ पितामही प्रपितामह्यः अमुकी देव्यो गङ्गा यमुना सरस्वती स्वरूपिण्यस्तृप्यध्वं स्वधा नमः" ॥ ३ ॥

" ॐ अद्याऽमुकगोत्राः अस्मन्मातामह प्रमातामह वृद्धप्रमातामहाः अमुकाऽमुकशर्माणः (गुप्ता वा) सपत्नीकास्तृप्यध्वं स्वधा नमः ॥ ३ ॥

जीवत्पितृकैः पुत्रैः शिष्यैश्चाचार्यस्य पितृतर्पणं कार्यम् । **तद्यथा**–"ॐ अद्याऽमुकगोत्राः अस्मदाचार्य पितरः अमुक शर्माणस्तृप्यध्वं स्वधा नमः" ॥

ततो यज्ञोपवीतिनो (सव्यो) भूत्वाऽऽचम्य सर्वे ऋष्य भिमुखाः सन्तो वंशानां वाचनं विनियोगं च कुर्युः ।

अथ वंशानां वाचनम् ।

"ॐ अयं पुर इत्यादिपंचानां साध्या ऋषयो यजूंषि प्राणभृतो देवताः । मूर्द्धेत्यादि द्वयोर्देवा ऋषयो यजूंषि लिङ्गोक्ता देवताः । माछन्द इत्यादि षोडशानां परमेष्ठी ऋषिर्यजूंषि लिङ्गोक्ता देवताः ऋषि तर्पणे **विनियोगः**" । ॐ सप्तऽऋषय इत्यस्य याज्ञवल्क्य ऋषिः सप्तर्षयो देवताः जगती छन्दः ऋषि तर्पणे **विनियोगः । इति ऋष्यादिकं स्मृत्वा ऋषीणामुपरि तर्पणं कर्तव्यम् ।**

तद्यथा–"ॐ अयम्पुरो भुवस्तस्य प्राणो भौवायनो व्वसन्तः प्राणायनो गायत्री व्वासन्ती गायत्र्यै । गायत्रङ्गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतो रथन्तरं व्वसिष्ठऽऋषिः प्रजापति गृहीतया त्वया प्राणङ्गृह्णामि प्रजाभ्यः ॥ १ ॥ अयन्दक्षिणा व्विश्वकर्म्मा तस्य मनो व्वैश्वकर्म्मणङ् ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मी त्रिष्टुभः स्वारꣳ स्वारादन्तर्यामोन्तर्यामात्पञ्चदशः पञ्चदशाद्बृहद्भरद्वाजऽ-ऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः ॥ २ ॥ अयम्पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं व्वर्षाश्चाक्षुष्या जगती व्वार्षीज-

गत्याऽऋक्कसममृक्कसमाच्छुक्रꣳ शुक्रात्सप्तदशꣳ सप्तदशाद्वैरूपाज्जमदग्नि ऋषिं ÷ प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामिप्रजाभ्य ÷ ॥ ३ ॥ इदमुत्त-रात्स्वस्तस्य श्रोत्रꣳ सौवꣳ शरच्छ्रौत्र्यनुष्टुप् शारद्यनुष्टुभऽऐडमैडान्मन्थी मन्थिनऽएकविꣳशऽएकविंशाद्वैराजं विश्वामित्रऽऋषिं ÷ प्रजापति गृहीतया त्वया श्रोत्रङ्गृह्णामि प्रजाभ्य ÷ ॥ ४ ॥ इयमुपरिमतिस्तस्यै वाङ्मात्याहेमन्तो व्वाच्यꣳ पंक्तिर्हेमन्तीपङ्क्त्यै निधनं वन्निधनवतऽआग्र-यणऽआग्रयणत्रिणवत्रयस्त्रिꣳ शौत्रिणवत्रयस्त्रिꣳशाभ्या ꣳ शाक्वररैवते विश्वकर्मऋषिं ÷ प्रजापतिगृहीतया त्वया व्वाचं गृह्णामि प्रजाभ्यो लोकन्ताऽइन्द्रम् ॥ ५ ॥ लोकम्पृणाच्छिद्रम्पृणाथोसीदद्ध्रुवात्वम् । इन्द्रा-ग्नीत्वाबृहस्पतिरस्मिन्न्योनावसीषदन् ॥ ६ ॥ ताऽअस्यसूददोहसꣳ सोमꣳ श्रीणन्तिपृश्नयः । जन्मन्देवानाँव्विशस्त्रिष्ष्वारोचनेदिवꣳ ॥ ७ ॥ इन्द्रं विश्वाऽअवीवृधन्त्समुद्रव्यं च सङ्गिरं ÷ । रथीतमꣳरथीनाँ व्वाजाना ꣳ सत्पतिम्पतिम् ॥ ८ ॥" मन्त्रोक्ता ऋषयस्तृप्यन्ताम् ।

"ॐ मूर्द्धाव्वय ÷ प्रजापतिश्छन्द ÷ क्षत्रँव्वयोमयन्दञ्छन्दो विष्ट-म्भोव्वयोधिपतिश्छन्दो व्विश्वकर्म्माव्वय ÷ परमेष्ठीच्छन्दो वस्तोव्वयो-व्विवलञ्छन्दो व्वृष्णिर्व्वयोव्विशालञ्छन्दꣳ पुरुषो व्वयस्तद्रञ्छन्दो व्याघ्रो-व्वयोनाधृष्टञ्छन्द ÷ सिꣳहोव्वयश्छदिश्छन्द ÷ षष्ठवाड्वयोबृहतीछन्दऽ उक्षाव्वय ÷ ककुप्छन्दऽऋषभो व्वय ÷ सतोबृहतीछन्दोनड्वान्वय ÷ ॥ ९ ॥ अनड्वान्वय ÷ पंक्तिश्छन्दोधेनुर्व्वयो जगतीच्छन्दस्त्र्यविर्व्वय-स्त्रिष्टुप्छन्दोदित्यवाड्वयो व्विराट्छन्दꣳ पञ्चाविर्व्वयोगायत्रीच्छन्दस्त्रिवत्सो

व्वयं॑ऽउष्णिक्छन्दस्तुर्यवाड्वयोनुष्टुप्छन्दोलोकन्ताऽइन्द्रम् " ॥ १० ॥

"मन्त्रोक्तानि छन्दांसि तृप्यन्ताम्"।

"ॐ माच्छन्द ÷ प्रमाच्छन्द ÷ प्रतिमाच्छन्दोऽअस्रीवयश्छन्द ÷ पंक्ति श्छन्दऽउष्णिक्छन्दोबृहतीछन्दोनुष्टुप्छन्दोव्विराट्छन्दो गायत्री- च्छन्दस्त्रिष्टुप्छन्दो जगतीच्छन्द ÷ ॥ ११ ॥ पृथिवी- च्छन्दोन्तरिक्षञ्छन्दो द्यौश्छन्दः समाश्छन्दोनक्षत्रा- णिच्छन्दो व्वाक्छन्दो मनश्छन्द ÷ कृषिश्छन्दो हिरण्यञ्छन्दो गौश्छन्दो- जाच्छन्दोश्वश्छन्द ÷ ॥ १२ ॥ अग्निर्देवता व्वातो देवता सूर्यो देवता चन्द्रमा देवता व्वसवो देवता रुद्रादेवता दित्यादेवता मरुतो देवता व्विश्वे- देवा देवता बृहस्पतिर्देवतेन्द्रो देवता व्वरुणो देवता" ॥ १३ ॥

"मन्त्रोक्ता देवतास्तृप्यन्ताम्" ॥

"ॐ एवश्छन्दो व्वरिवश्छन्द ÷ शम्भूश्छन्द ÷ परिभूश्छन्दऽआच्छ- च्छन्दो मनश्छन्दो व्यचश्छन्दः सिन्धुश्छन्द ÷ समुद्रश्छन्दः सरिरञ्छन्दः ककुप्छन्द स्त्रिककुप्छन्द ÷ काव्यञ्छन्दोऽअङ्कुप्छन्दो क्षरपङ्क्तिश्छन्द ÷ पदपङ्क्तिच्छन्दो व्विष्टारपङ्क्तिश्छन्द ÷ क्षुरोभ्रजश्छन्दऽआच्छच्छन्द ÷ प्रच्छच्छन्द ÷ ॥ १४ ॥ आच्छच्छन्द ÷ प्रच्छच्छन्द ÷ संयच्छन्दो व्वियच्छन्दो बृहच्छन्दो रथन्तरञ्छन्दो निकायश्छन्दो व्विवधश्छन्दो गिर- श्छन्दो भ्राजश्छन्द ÷ सठँस्तुपछन्दो नुष्टुपूछन्दऽएवश्छन्दो व्वरिवश्छन्दो व्वयश्छन्दो व्वयस्कृच्छन्दो व्विष्पर्द्धाश्छन्दो व्विशालञ्छन्दश्छदिश्छन्दो दूरोहणञ्छन्दस्तन्द्रञ्छन्दोऽअङ्काङ्कञ्छन्द ÷ " ॥ १५ ॥ **मन्त्रोक्तानि छन्दांसि तृप्यन्ताम्"।**

ॐ रश्मिनासत्यायसत्यञ्जिन्वप्प्रेतिनाधर्म्मणाधर्म्मञ्जिन्वान्वित्यादिवादि
वञ्जिन्व सन्धिनान्तरिक्षेणान्तरिक्षञ्जिन्वप्रतिधिनापृथिव्यापृथिवीञ्जिन्वव्विष्ट
म्भेनवृष्ट्यावृष्टिञ्जिन्वप्रवयान्हाहर्जिन्वानुयाराव्यारात्रीञ्जिन्वोशिजाव्वसुभ्यो
व्वसूञ्जिन्वपप्रकेतेनादित्येब्भ्यऽआदित्याञ्जिन्न्वतन्तुना रायं॥ १६ ॥ तन्तु-
नारायस्पोषेण रायस्पोषञ्जिन्व सᳬसर्प्पेण श्रुताय श्रुतञ्जिन्वैडेनौषधीभिरोष-
धीर्जिन्वोत्तमेन तनूभिस्तनूर्जिन्वव्वयोधसाधीतेनाधीतञ्जिन्वाभिजिता तेजसा ते
जोजिन्व ॥ १७ ॥ प्रतिपदसिप्प्रतिपदेत्वानुपदस्यनुपदेत्वा सम्पदसि सम्पदे-
त्वातेजोसितजसेत्वात्रिवृदसि ॥ १८ ॥ त्रिवृदसि त्रिवृतेत्वाप्प्रवृदसिप्प्रवृतेत्वा-
व्विवृदसि व्विवृतेत्त्वासवृदसि सवृतेत्त्वाक्रमोस्याक्रमायत्वा सङ्क्रमोसि सङ्क्र-
मायत्त्वोत्क्रमोस्युत्क्रमायत्वोत्क्रान्तिरस्युत्क्रान्त्यैत्त्वाधिपतिनोर्ज्जोर्ज्जञ्जिन्व १९
राज्ञ्यसिप्प्राचीदिग्वसवस्तेदेवाऽअधिपतयोग्निर्हेतीनाम्प्रतिधर्तात्रिवृत्त्वास्तोमः
पृथिव्याᳪश्रयत्त्वाज्यमुक्थमव्व्यथायैस्तभ्नातुरथन्तरᳬसामप्प्रतिष्ठित्याऽअन्त
रिक्षऽऋषयस्त्वाप्प्रथमजादेवेषु दिवोमात्रयाव्वरिम्णाप्प्रथन्तुविधर्ताचायमधिप-
तिश्चतेत्त्वासर्व्वे संव्विदानानाकस्यपृष्ठेस्वर्गेलोकेयजमानञ्चसादयन्तु॥ २०॥व्वि-
राडसिदक्षिणादिग्रुद्रास्ते देवाऽअधिपतयऽइन्द्रोहेतीनाम्प्रतिधर्त्तापञ्चदशस्त्वा
स्तोमः पृथिव्या ᳪश्रयतुप्प्रऽउगमुक्थमव्व्यथायैस्तभ्नातु बृहत्साम-
प्प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वा प्रथमजा देवेषु दिवोमात्रया व्वरिम्णाप्प्र-
थन्तु व्विधर्ताचायमधिपतिश्चतेत्त्वा सर्व्वे संव्विदानानाकस्य पृष्ठे स्वर्गे लोके
यजमानञ्च सादयन्तु ॥ २१ ॥ सम्म्राडसिप्प्रतीचीदिगादित्यास्ते देवाऽ-
अधिपतयो व्वरुणो हेतीनाम्प्रतिधर्त्ता सप्तदशस्त्वा स्तोमः

पृथिव्या ७ं श्रयतु मरुत्त्वतीयमुक्थमव्यथायैस्तभ्नातु वैरूपठ्ं साम प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वा प्रथमजादेवेषु दिवोमात्रया वरिम्णा प्रथन्तु विधर्त्ता चायमधिपतिश्चतेत्वा सर्व्वे संविदानानाकस्य पृष्ठे स्वर्गे लोकेयजमानञ्च सादयन्तु ॥ २२ ॥ स्वराडस्युदीचीदिङ्मरुतस्ते देवाऽअधिपतयः सोमोहेतीनाम्प्रतिधर्त्तैकविंठ्ं शस्त्वास्तोम ÷ पृथिव्या ७ं श्रयतुनिष्केवल्यमुक्थमव्यथायै स्तभ्नातु वैराजठ्ं सामप्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वाप्रथमजादेवेषु दिवोमात्रयावरिम्णाप्रथन्तुविधर्त्ता चायमधिपतिश्चतेत्वा सर्वे संविदानानाकस्य पृष्ठे स्वर्गेलोकेयजमानञ्च सादयन्तु ॥ २३ ॥ अधिपत्न्यसिबृहतीदिग्विश्वे ते देवाऽअधिपतयो बृहस्पतिर्हेतीनाम्प्रतिधर्त्तात्रिणवत्रयस्त्रिठ्ंशौत्त्वास्तोमौपृथिव्या ७ं श्रयतां वैश्वदेवाग्निमारुतेऽउक्थेऽअव्यथायैस्तभ्नीता ७ं शाक्वररैवते सामनी प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वा प्रथमजादेवेषु दिवो मात्रया वरिम्णा प्रथन्तुविधर्त्ता चायमधिपतिश्चते त्वा सर्व्वे संविदानानाकस्य पृष्ठे स्वर्गे लोके यजमानञ्च सादयन्तु ॥ २४ ॥ अयम्पुरोहरिकेशः सूर्य्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानी ग्रामण्यौ। पुञ्जिकस्थलाचक्रतु स्थलाचक्रतुस्थलाचाप्सरसौदङ्क्ष्णवः पशवोहेतिः पौरुषेयोवधः प्रहेतिस्तेभ्यो नमोऽस्तुतेनोवन्तु तेनोमृडयन्तु ते यन्द्विष्मो यश्चनोद्वेष्टितमेषाञ्जम्भे दध्मः ॥ २५ ॥ अयन्दक्षिणाविश्वकर्म्मातस्य रथस्वनश्च रथेचित्रश्चसेनानीग्रामण्यौमेनकाचसहजन्याचाप्सरसौ यातुधानाहेतीरक्षा ७ं सिप्रहेतिस्तेभ्यो नमोऽस्तुतेनोवन्तुतेनो

मृडयन्तुतेयन्द्विष्मोयश्चनो द्वेष्टितमेषाञ्जम्भेदध्मः ॥ २६ ॥ अयम्पश्चाद्विश्वव्यचास्तस्यरथप्रोतश्चासमरथश्चसेनानी ग्रामण्यौ । प्रम्लोचन्तीचानुम्लोचन्तीचाप्सरसौव्याघ्राहेतिःसर्पाः प्रहेतिस्तेभ्यो नमोऽअस्तुतेनोवन्तुतेनो मृडयन्तु ते यन्द्विष्मोयश्चनो द्वेष्टितमेषाञ्जम्भे दध्म ÷ ॥ २७ ॥ अयमुत्तरात्संयद्वसुस्तस्यतार्क्ष्यश्चारिष्टनेमिश्चसेनानी ग्रामण्यौ विश्वाचीचघृताची चाप्सरसावापोहेतिर्वातःप्रहेतिस्तेभ्यो नमोऽअस्तुतेनोवन्तुतेनो मृडयन्तु तेयन्द्विष्मो यश्चनो द्वेष्टितमेषाञ्जम्भे दध्मः ॥ २८ ॥ अयमुपर्य्यर्वाग्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानी ग्रामण्यौऽउर्वशीचपूर्वचित्तिश्चाप्सरसावस्फूर्ज्जन्हेतिर्विद्युत्प्रहेतिस्तेभ्यो नमोऽअस्तुतेनोवन्तु तेनो मृडयन्तुते यन्द्विष्मोयश्चनो द्वेष्टितमेषाञ्जम्भे दध्मः ॥ २९ ॥" मन्त्रोक्ता देवतास्तृप्यन्ताम् ।

"ॐ सप्तऽऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् । सप्तापः स्वपतो लोकमीयुस्तत्र जागृतोऽअस्वप्नजौ सत्र सदौ च देवौ" ॥ ३० ॥ मन्त्रोक्ता ऋषयस्तृप्यन्ताम् ।

अथ वंशानां वाचनम् ।

"ॐ अथवंशः समानमासाञ्जीवीपुत्रात्साञ्जीवीपुत्रो माण्डूकायनेर्माण्डूकाय निर्माण्डव्यान्माण्डव्यः कौत्सात्कौत्सोमाहित्थेर्माहित्थिर्वामकक्षायणाद्वामकक्षायणोवात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यःकुश्रेःकुश्रिर्यज्ञवचसोराजस्तम्बायनाद्यज्ञवचाराजस्तंबायनस्तुरात्कावषेयात्तुरः कावषेयः प्रजापतेः प्रजापतिर्ब्रह्मणो ब्रह्मस्वयंभुर्ब्रह्मणे नमः ॥ १ ॥" वंशोक्ता ऋषयस्तृप्यन्ताम् ।

" ॐ अथव्वठ्ठ शस्तदिदं व्यवठ्ठ शौर्पणाय्याच्छौर्पणाय्योगौतमाद्
गौतमो व्वात्स्याद्वात्स्यो व्वात्स्याच्चपाराशर्य्याच्चपाराशर्य्यᳬ साङ्कृत्याश्च
भारद्वाजाश्च भारद्वाजऽऔदवाहेश्च शाण्डिल्याच्च शाण्डिल्यो वैजवापाश्च
गौतमाश्च गौतमोव्वैजपायनाश्चव्वैष्टपुरेयाच्च व्वैष्टपुरेयᳬ शाण्डिल्याच्च रौहि-
णायनाच्च रौहिणायनᳬ शौनकाच्चात्रेयाच्चरैभ्याश्चरैभ्यᳬ पौतिमाष्यायणाच्च
कौण्डिन्यायनाश्च कौण्डिन्यायनᳬ कौण्डिन्यात्कौण्डिन्यᳬ कौण्डिन्या-
कौण्डिन्यᳬ कौण्डिन्याचाग्निवेश्याच्च॥२॥अग्निवेश्यᳬसैतवात्सैतवःपाराशर्य्या-
त्पाराशर्य्यो जातूकर्ण्याज्जातूकर्ण्यौभारद्वाजाद्भारद्वाजोभारद्वाजाच्चासुरायणा-
च्चगौतमाच्चगौतमो भारद्वाजाद्भारद्वाजो वैजवापायनाद्वैजवापायनःकौशिका-
यनेः कौशिकायनिर्घृतकौशिकाद् घृतकौशिकःपाराशर्य्यायणात्पाराशर्य्याः-
यणᳬ पाराशर्य्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद् भार-
द्वाजो भारद्वाजाच्चासुरायणाच्चयास्काच्चासुरायण स्त्रैवणे स्त्रैवणि रौप
जन्घनेरौपजन्घनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाजऽआत्रेयात् ॥ ३ ॥ आत्रे-
यादात्रेयोमाण्टेर्माण्टि गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यᳬ
शाण्डिल्याच्छाण्डिल्यᳬ कैशोर्य्यात्काप्यात् कैशोर्यᳬ काप्यᳬ कुमारहारिता-
त्कुमारहारितो गालवाद्गालवो विदर्भी कौण्डिन्या द्विदर्भी कौण्डिन्यो
वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवᳬ पन्थᳬ सौभरात्पन्थाᳬ सौभरोऽयास्या-
दाङ्गिरसादयास्यऽआङ्गिरसऽआभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्रा-
द्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीचऽआथर्वणाद्दध्यङ्ङाथर्वणो देवादथर्वा-
देवो मृत्योᳬ प्राध्वठ्ठ सनान्मृत्युᳬ प्राध्वठ्ठ सनᳬ प्रध्वठ्ठ सनात्प्रध्वठ्ठ सनऽ

एकर्षेरेकर्षिर्वि प्रचित्ते र्विप्रचित्तिर्व्यष्टेर्व्यष्टिꣳ सनारोꣳ सनारुꣳ सनातना त्सनातनꣳ सनगात्सनगꣳ परमेष्ठिनꣳ परमेष्ठी ब्रह्मणो ब्रह्मस्वयम्भुब्रह्मणे नमःꣳ ॥" ॥ ४ ॥ **वंशोक्ता ऋषयस्तृप्यन्ताम् ।**

"ॐ अथवꣳ शस्तदिदं व्वयꣳ शौपर्णाय्या च्छौपर्णाय्यो गौतमाद्गौतमो व्वात्स्याद् व्वात्स्यो वात्स्याच्च पाराशर्य्याच्च पाराशर्य्यः साङ्कृत्याच्च भारद्वाजाश्च भारद्वाजऽऔदवाहेश्च शाण्डिल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्चगौतमो व्वैजवापायनाच्च व्वैष्टपुरेयाच्च व्वैष्टपुरेयः शाण्डिल्याच्चरौहिणायनाच्च रौहिणायनः शौनकायाच्च जैवन्तायनाश्चरैभ्याच्चरैभ्यꣳ पौतिमाष्यायणाच्च कौण्डिन्यायनाच्च कौण्डिन्यायनः कौण्डिन्याभ्यां कौण्डिन्य ऽऔर्णवाभेभ्यऽऔर्णवाभाः कौण्डिन्यात्कौण्डिन्यꣳ कौण्डिन्याश्चाग्निवेश्याश्च ॥ ५ ॥ आग्निवेश्यꣳ सैतवात्सैतवꣳ पाराशर्य्यात्पाराशर्य्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजो वलाकाकौशिकाद्वलाकाकौशिकः काषायणात्काषायणः सौकरायणात्सौकरायणस्त्रैवणेस्त्रैवणि रौपजन्घने रौपजन्घनि ꣳ सायकायनात्सायकायनꣳ कौशिकायनेꣳ कौशिकायनि र्घृतकौशिकाद्घृतकौशिकꣳ पाराशर्य्यायणात्पाराशर्य्यायणꣳ पाराशर्य्यात्पाराशर्य्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणि रौपजन्घने रौपजन्घनि रासुरेरासुरिर्भारद्वाजाद्भारद्वाजऽआत्रेयात् ॥ ६ ॥ आत्रेयादात्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमोगौतमाद्गौतमो व्वात्स्याद्वात्स्यꣳ शाण्डिल्याच्छाण्डिल्यꣳ

कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्याद् विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद् दध्याङ्ङाथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रचित्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणे । ब्रह्म स्वयम्भु ब्रह्मणे नमः ॥ ७ ॥ **वंशोक्ता ऋषयस्तृप्यन्ताम् ।**

"ॐ अथ वंशः तदिदं वयं भारद्वाजीपुत्राद्भारद्वाजीपुत्रो वात्सीमाण्डवीपुत्राद्वात्सीमाण्डवीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो गार्गीपुत्राद्गार्गीपुत्रः पाराशरीकौण्डिनी पुत्रात्पाराशरीकौण्डिनीपुत्रो गार्गीपुत्राद्गार्गीपुत्रो वाडेयीपुत्राद्वाडेयीपुत्रो मौषिकीपुत्रान्मौषिकी पुत्रो हारिकर्णीपुत्राद्धारिकर्णीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पैङ्गीपुत्रात्पैङ्गीपुत्रः शौनकीपुत्राच्छौनकीपुत्रः ॥ ८ ॥ काश्यपीबालाक्यामाठरीपुत्रात्काश्यपीबालाक्या माठरीपुत्रः कौत्सीपुत्रात्कौत्सीपुत्रो बौधीपुत्राद्बौधीपुत्रः शालङ्कायनीपुत्राच्छालङ्कायनी पुत्रो वार्षगणीपुत्राद्वार्षगणीपुत्रो गौतमीपुत्राद्गौतमीपुत्र आत्रेयीपुत्रादात्रेयीपुत्रो गौतमी पुत्रा द्गौतमी पुत्रो वात्सीपुत्राद्वात्सीपुत्रो भारद्वाजी पुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वार्कारुणीपुत्राद्वा—

कारुणीपुत्रऽआर्त्तभागीपुत्रादार्त्तभागीपुत्रः शौङ्गीपुत्राच्छौङ्गीपुत्रः साङ्कृती
पुत्रात्सांकृतीपुत्रः ॥ ९ ॥ आलम्बीपुत्रादालम्बीपुत्रऽआलम्बायनीपुत्रादाल-
म्बायनीपुत्रो जायन्तीपुत्राज्जायन्तीपुत्रो माण्डूकायनीपुत्रान्माण्डूकायनीपुत्रो
माण्डूकीपुत्रान्माण्डूकीपुत्रः शाण्डिलीपुत्रा च्छाण्डिलीपुत्रो राथीतरीपुत्रा
द्राथीतरीपुत्रः क्रौञ्चिकीपुत्राभ्यां क्रौञ्चिकीपुत्रौ वैदभृतीपुत्रा द्वैदभृतीपुत्रो
भालुकीपुत्राद्भालुकीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः साञ्जीवीपुत्रा-
त्साञ्जीवीपुत्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः ॥ १० ॥ प्राश्नीपुत्रादासुरि-
वासिनः प्राश्नीपुत्रऽआसुरायणादासुरायणऽआसुरेरासुरिर्याज्ञवल्क्याद्याज्ञव-
ल्क्यऽउद्दालकादुद्दालकोऽरुणादरुणऽउपवेशेरुपवेशिः कुश्रेः कुश्रिर्व्वाजश्रवसो
वाजश्रवा जिह्वावतो वाध्योगाज्जिह्वावान्वाध्योगोसिताद्वार्षगणादसितो व्वार्ष-
गणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः
कश्यपान्नैध्रुवेः कश्यपोनैध्रुविर्व्वाचोव्वागम्भिण्याऽअम्भिण्यादित्यादादित्यानि
मानिशुक्लानि यजूᳪंषि व्वाजसनेयेन याज्ञवल्क्योनाख्यायन्ते ” ॥ ११ ॥

वंशोक्ता ऋषय स्तृप्यन्ताम्।

“ॐ इमावेव गौतमभरद्वाजावयमेव गौतमोऽयं भारद्वाजऽइमावेव
व्विश्वामित्रजमदग्नीऽअयमेवव्विश्वामित्रोऽयं जमदग्निरिमावेव व्वसिष्ठकश्यपा
व्वयमेवव्वसिष्ठोऽयं कश्यपोव्वागेवात्रिर्व्वाचाह्यन्नमद्यतेतिर्हवै नामैतद्यदत्रि-
रिति सर्व्वस्यात्ता भवति सर्व्वमस्यान्नम्भवति यऽएवंव्वेद ” ॥ १२ ॥

ॐ ब्राह्मणोक्ता ऋषयस्तृप्यन्ताम्।

"ॐ भूर्भुवः स्वः तत्सवितुरिति चतुर्वारं गायत्रीं पठेत् । इति प्रति वंशवंशोक्तानामृषीणां तर्पणम् ।

ततः सर्वे "ॐ विरताः स्म" इति सकृदुच्चैर्ब्रूयुः ।

अथाऽध्ययन क्रमः ।

अथ केवलं वेदाध्ययनम् । यदि कश्चिन्नाध्येतुं शक्नुयात्तदाऽऽचार्यमुखादधीयमानान्मन्त्रान् श्रृणुयादेव, ते चत्वारिंशत् ४० अध्याय मन्त्राः ।

तद्यथा— 'ॐ इषेत्वोर्जेत्वावायवस्थदेवोवः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽआप्यायध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमा घशꣳसोध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्यजमानस्य पशून्पाहि ॥१॥ कृष्णोऽस्याखरेष्ठोऽग्नये त्वाजुष्टम्प्रोक्षामि ॥ वेदिरसि बर्हिषे त्वाजुष्टम्प्रोक्षामि बर्हिरसिस्रुग्भ्यस्त्वाजुष्टम्प्रोक्षामि ॥ २ ॥ समिधाग्निन्दुवस्यतघृतैर्बोधयतातिथिम् । आस्मिम् हव्याजुहोतन ॥ ३ ॥ एदमगन्मदेवयजनम्पृथिव्यायत्रदेवासोऽअजुषन्त विश्वेऽऋक्सामाभ्याꣳसन्तरन्तोयजुर्भीरायस्पोषेण समिषामदेमऽइमाऽआपः शमुमे सन्तु देवीरोषधे त्रायस्वस्वधिते मैनꣳहि ꣳ

---

१ ऋषितर्पणे कस्यांचित्पद्धतौ अधिकमन्त्रा दृश्यन्ते, कस्याञ्चिच्च न्यूनास्तदुभयं प्रामादिकमेव प्रतीयते ।

तथाचाऽत्रकारिकायाम्—" पुराणाचार्यान् गन्धर्वानितराचार्यास्तथैवच । अहोरात्राण्यर्धमासा मासा ऋतव एवच ॥ सम्वत्सरोऽवयवैः सार्द्धमयं पुरश्च पञ्चभिः । मन्त्रैर्द्वाभ्यां मूर्द्धेति माच्छान्दस्तिस्र एव च । एवः षोडशभिर्मन्त्रैः सप्त ऋषय इत्येकया । चतुर्भिस्तर्पयेद्व्रंशैरिमावेवेत्यनेन च " इति ।

सीतः ॥ ४ ॥ अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वातिथेरातिथ्यमसि विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वाग्नये त्वा रायस्पोषदे विष्णवे त्वा ॥ ५ ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् । आददे नार्यसीदमहꣳ रक्षसां ग्रीवाऽअपि कृन्तामि ॥ यवोऽसि यवयास्मद्द्वेषो यवयारातीः । दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥ ६ ॥ वाचस्पतये पवस्व वृष्णो अꣳशुभ्यां गभस्तिपूतो देवो देवेभ्यः पवस्व येषां भागोऽसि ॥ ७ ॥ उपयामगृहीतोऽस्यादित्येभ्यस्त्वा विष्णऽउरुगायैष ते सोमस्तꣳ रक्षस्व मा त्वा दभन् ॥ ८ ॥ देव सवितः प्रसुव यज्ञम्प्रसुव यज्ञपतिम्भगाय । दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाजन्नः स्वदतु स्वाहा ॥ ९ ॥ अपो देवा मधुमतीरगृभ्णन्नूर्जस्वती राजस्वश्चितानाः । याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥ १० ॥ युञ्जानः प्रथमम्मनस्तत्त्वाय सविता धियः । अग्नेर्ज्योतिर्निचाय्य पृथिव्याऽअध्याभरत ॥ ११ ॥ दृशानो रुक्मऽउर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः । अग्निरमृतोऽअभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः ॥ १२ ॥ मयि गृह्णाम्यग्रेऽअग्निꣳ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय मामु देवताः सचन्ताम् ॥ १३ ॥ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि ध्रुवं योनिमासीद साधुया । उख्यस्य केतुम्प्रथमञ्जुषाणाऽअश्विनाध्वर्यू सादयतामिह त्वा ॥ १४ ॥ अग्ने जातान्प्रणुदा नः सपत्नान् प्रत्यजातान्नुद जातवेदः । अधि नो ब्रूहि सुमनाऽअहेडँस्तव स्याम शर्मँस्त्रिवरूथऽउद्भौ ॥ १५ ॥ नमस्ते रुद्र मन्यवऽउतोतऽइषवे नमः । बाहुभ्यामुत ते नमः ॥ १६ ॥ अश्मन्नूर्जं पर्वते शिश्रिया-

णामद्भ्यऽओषधीभ्यो वनस्पतिभ्योऽअधिसम्भृतम्पयः ॥ तान्नऽइषमूर्ज-
न्धत्त मरुतः सꣳरराणाऽअश्मँ स्तेक्षुन्मयितऽऊर्ग्यद्विष्मस्ततेशुग्गृच्छतु
॥१७॥व्वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्चमे क्रतुश्चमे
स्वरश्चमे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्चमे स्वश्चमे यज्ञेनकल्पन्ताम्
॥ १८ ॥ स्वाद्वीन्त्वास्वादुनातीव्रान्तीव्रेणामृताममृतेन । मधुमतीमधुमता-
सृजामि सꣳ सोमेन सोमोऽस्यश्विभ्याम्पच्यस्वसरस्वत्यै पच्यस्वेन्द्राय
सुत्राम्णे पच्यस्व ॥ १९ ॥ क्षत्रस्ययोनिरसि क्षत्रस्यनाभिरसिमात्वाहिꣳ-
सीन्मामाहिꣳसीः ॥ २० ॥ इमम्मे व्वरुण श्रुधीहवमद्याचमृडयत्वामव-
स्युराचके ॥ २१ ॥ तेजोऽसि शुक्रममृतमायुष्याऽआयुर्मेपाहि । देवस्य
त्वासवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्यामाददे ॥ २२ ॥ हिरण्य-
गर्भःसमवर्त्तताग्रेभूतस्यजातः पतिरेकऽआसीत् । सदाधार पृथिवीन्द्यामुते-
माङ्कस्मै देवाय हविषा विधेम ॥२३॥ अश्वस्तूपरो गोमृगस्ते प्राजापत्याः ।
कृष्णग्रीवऽआग्नेयो रराटे पुरस्तात्सरस्वती मेष्यधस्ताद्धन्वोरश्विना वधोरामौ
बाह्वोः सौमा पौष्णः श्यामोनाभ्याꣳसौ र्य यामोश्वेतश्चकृष्णश्च पार्श्वयो-
स्त्वाष्ट्रौ लोमशसक्थौसक्थ्योर्वायव्यः श्वेतः पुच्छऽइन्द्रायस्वपस्यायव्वेह-
द्वैष्णवोवामनः ॥ २४ ॥ शादन्द द्भिरवकान्दन्तमूलैर्मृदम्बर्स्वैस्तेगान् दꣳ-
ष्ट्राभ्याꣳसरस्वत्याऽअग्रजिह्वञ्जिह्वायाऽउत्सादमवक्रन्देनतालुव्वाजꣳ हनुभ्या-
मपऽआस्येन वृषणमाण्डाभ्यामादित्याँश्मश्रुभिः पन्थानम्भ्रूभ्यान्द्यावापृथिवी-
वर्त्तोभ्याँव्विद्युतङ्कुनीनिकाभ्याꣳशुक्लाय स्वाहा कृष्णाय स्वाहा पार्य्याणि पक्ष्मा
ण्यवार्य्याऽइक्षवोऽवार्य्याणि पक्ष्माणि पार्य्याऽइक्षवः ॥ २५ ॥ अग्निश्च

पृथिवी च सन्नंते ते मे सन्नंमतामदः । सप्तसर्ठ सदौऽअष्टमीभूत साधनी । सकामा इँ अध्वनस्कुरुसञ्ज्ञानमस्तुमेऽमुना ॥ २६ ॥ समास्त्वाग्नऽऋतवो वर्धयन्तु सँव्वत्सराऽऋषयोयानिसत्या । सन्दिव्येनदीदिहिरोचनेनविश्वाऽआभाहि प्रदिशश्चतस्रः ॥ ॥ २७ ॥ होतायक्षत्समिधेन्द्रमिडस्पदेनाभापृथिव्याऽअधि । दिवोवर्ष्मन्त्समिध्यत ओजिष्ठश्चर्षणीसहाम्वेत्वाज्यस्यहोतर्यज ॥ २८ ॥ समिद्धो अञ्जन्कृदरम्मतीनाङ्घृतमग्नेमधुमत्पिन्वमानः । वाजीवहन्वाजिनञ्जातवेदोदेवानांव्वक्षिप्रियमासधस्थम् ॥ २९ ॥ देवसवितः प्रसुवयज्ञम्प्रसुवयज्ञपतिम्भगाय । दिव्योगन्धर्वः केतपूः केतन्नःपुनातु वाचस्पतिर्वाचन्नः स्वदतु ॥ ३० ॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । सभूमिं सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ ३१ ॥ तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः । तदेवशुक्रन्तद्ब्रह्मतदाऽआपःस्तत्प्रजापतिः ॥ ३२ ॥ अस्याजरासोदमामरित्राऽअर्चद्धूमासोऽअग्नयःपावकाः ॥ श्वितीचयःश्वात्रासोभुरण्यवोवनर्षदोवायवोनसोमाः ॥ ३३ ॥ यज्जाग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवैति । दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मेमनःशिवसङ्कल्पमस्तु ॥ ३४ ॥ अपेतोयन्तु पणयो सुम्नादेव पीयवः । अस्य लोकः सुतावतः । द्युभिरहोभिरक्तुभिर्व्यक्तँय्यमोददात्ववसानमस्मै ॥३५॥ ऋचँव्वाचम्प्रपद्ये मनो यजुः प्रपद्ये सामप्राणम्प्रपद्ये चक्षुः श्रोत्रम्प्रपद्ये वागोजः सहौजोमयि प्राणापानौ ॥ ३६ ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् । आददेनारिरसि ॥ ३७ ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम् । आददेऽदित्यैरास्नासि॥ ३८॥

स्वाहा प्राणेभ्यः साधिपतिकेभ्यः । पृथिव्यै स्वाहाऽग्नयेस्वाहान्तरिक्षाय स्वाहा ॥ वायवे स्वाहादिवे स्वाहा सूर्य्यायस्वाहा ॥ ३९ ॥ ईशावास्यमिदꣳ सर्वंय्यत्किञ्चजगत्याञ्जगत् । तेनत्यक्तेन भुञ्जीथामागृधः कस्यस्विद्धनम् ॥ ४० ॥ हिरण्मयेन पात्रेण सत्यस्यापिहितम्मुखम् । योसावादित्येपुरुषः सोऽसावहम् " ॥ ४१ ॥ ॐ खम्ब्रह्म । इति चत्वारिंशदध्यायोक्ता ऋषयस्तृप्यन्ताम् ।

अथ शतानि ।

" ॐ इषेत्वोर्जेत्वावायवस्थदेवोवः सविता प्रार्पयतु श्रेष्ठतमायकर्मणऽआप्यायध्वमघ्न्याऽइन्द्राय भागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघशꣳसोध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्यजमानस्य पशून्पाहि ॥ १ ॥ परिते धन्वनोहेति रस्मान्वृणक्तुविश्वतः । अथोयऽइषुधिस्तवारेऽअस्मन्निधेहितम् ॥ ॥ २ ॥ अग्नेनयसुपथारायेऽअस्मान्विश्वानि देववयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्तेनमऽउक्तिंविधेम ॥ ३ ॥ उपयाम गृहीतोसिसुशर्मासि सुप्रतिष्ठानोबृहदुक्षाय नमः । विश्वेभ्यस्त्वादेवेभ्यऽएषतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः ॥ ४ ॥ सोमस्यत्विषिरसितवेवमेत्विषिर्भूयात् । मृत्योः पाहिऽओजोसिसहोस्यमृतमसि ॥ ५ ॥ परस्याऽअधि सँव्वतो वराँ २ ॥ऽअभ्यन्तर ॥ यत्राहमस्मि ताँ २॥ ऽअव ॥ ६ ॥ अन्न्यावोऽअन्न्यामवत्वन्न्यान्यस्याऽउपावत । ताः सर्वाः सँव्विदानाऽइदम्मेप्रावता व्वचः ॥ ७ ॥ राज्ञ्यसि प्राचीदिग्विराडसि दक्षिणादिक् सम्राडसिप्रतीचीदिक्स्वराडस्युदीचीदिगधिपत्न्यसिबृहतीदिक् ॥ ८ ॥ नमो हिरण्य बाहवे

सेनान्यें दिशाञ्चपतये नमो नमों वृक्षेभ्यो हरिकेशेभ्यः पशूनाम्पतये नमो नमः शष्पिञ्जराय त्विषीमते पथीनाम्पतये नमो नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमो नमों वलुशाय ॥ ९ ॥ इन्द्रेमम्प्रतरान्नयसजातानामस-द्वशी । समें नँ व्वर्चसासृजदेवानाम्भागदाऽअसत् ॥ १० ॥ इमौतेपक्षावज-रौपतत्रिणौ याभ्याछंरक्षांछंस्यपहछंस्यग्ने । ताभ्यांपतेमसुकृतामुलोकँय्यत्र ऽऋषयोजग्मुः प्रथमजाः पुराणाः ॥ ११ ॥ अन्नात्परिस्रुतोरसम्ब्रह्मणाव्व्य-पिबत्क्षत्रम्पयः सोमम्प्रजापति ÷ । ऋतेन सत्यमिन्द्रियँव्विपानछंशुक्रम-न्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ १२ ॥ अश्विना तेजसा चक्षु ÷ प्राणेन सरस्वतीवीर्य्यम् । वाचेन्द्रो बलेनेन्द्राय दधुरिन्द्रियम् ॥ १३ ॥ पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा सूर्य्याय स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा परिप्लवेभ्यः स्वाहा चराचरेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा ॥ १४ ॥ प्रजापतये च वायवे च गोमृगोवरुणायारण्योमेषो यमाय कृष्णो मनुष्यराजाय मर्कट ÷ शार्दूला-यरोहिदृषयायगवयी क्षिप्रश्येनाय वार्तिकानीलङ्गो ः क्रमि ÷ समुद्रायशिशुमारो-हिमवतेहस्ती ॥ १५ ॥ तेऽअस्ययोषणेदिव्येन योनाऽउषासानक्ता । इमँ-य्यज्ञमवतामध्वरन्न ÷ ॥ १६ ॥ तनूनपात्पथऽऋतस्ययानान्मध्वासमञ्ज-न्स्वदयासुजिह्वमन्मानिधीभिरुतयज्ञमृन्धन्देवत्राचकृणुह्यध्वरन्न ÷ ॥ १७ ॥ अयमिह प्रथमोधायिधातृभिर्होता यजिष्ठोऽअध्वरेष्वीड्य ÷ । यमप्नवानो-भृगवोविरुरुचुर्वनेषु चित्रँ व्विभ्वँव्विशेविशे ॥ १८ ॥ अनुनोऽद्यानुमतिर्यज्ञ-न्देवेषु मन्यताम् । अग्निश्च हव्यवाहनो भवतन्दाशुषे मय ÷ ॥ १९ ॥

इयत्यग्रे ऽआसीन्मखस्य ते द्य शिरो राध्यासं देव यजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ २० ॥

अथ कण्डिकाः ।

व्रतमुपैष्यन् ॥ १ ॥ सर्वैकपालान्येवान्यतरऽउपदधाति ॥ २ ॥ सर्वैस्रुचः सम्मार्ष्टि ॥ ३ ॥ हिङ्कृत्यान्वाह ॥ ४ ॥ सवै प्रवरायाश्रावयति ॥५॥ ऋतवो हवैदेवेषुयज्ञेभागमीषिरे ॥ ६ ॥ सव्वैपर्णशाखयाव्वत्सानपाकरोति ॥ ७ ॥ मनवेहव्वैप्रातः ॥ ८ ॥ सयत्राह ॥ ९ ॥ ससयद्वाइतश्चेतश्च सम्भरन्ति ॥ १० ॥ उद्धृत्याहवनीयम्पूर्णाहुतिं जुहोति ॥ ११ ॥ सूर्यो हवाऽअग्निहोत्रम् ॥ १२ ॥ अथहुतेऽग्निहोत्रऽउपतिष्ठते ॥ १३ ॥ प्रजापतिर्हव्वाऽइदमग्र एकऽएवास ॥ १४ ॥ पित्रामहा हव्विषाह वैदेवाव्वृत्रञ्जघ्नुः ॥ १५ ॥ देवयजनञ्जोषयन्ते ॥ १६ ॥ दक्षिणेनाहवनीयं प्राचीन ग्रीवे कृष्णाजिनेऽउपस्तृणाति ॥ १७ ॥ सप्तपदान्यनुनिष्क्रामति ॥ १८ ॥ शिरो व्वैयज्ञस्यातिथ्यंबाहूप्रायणीयोदयनीयौ ॥ १९ ॥ तद्यऽएषपूर्वार्ध्यो व्वर्षिष्ठस्थूणराजो भवति ॥ २० ॥ उदरमेवास्य सदः ॥ २१ ॥ अग्निमादत्ते ॥ २२ ॥ तद्यत्रैतत्प्रवृत्तोहोताहोतृषदनऽउपविशति ॥ २३ ॥ प्रजापतिर्व्वै प्रजाःससृजानोरिरिचानऽइवामन्यत ॥ २४ ॥ प्राणोहव्वाऽअस्योपा र्थ्शुः ॥ २५ ॥ चक्षुषीहव्वाऽअस्यशुक्रामन्थिनौ । २६ ॥ भक्षयित्वा समुपहूताःस्मऽइत्युक्त्वोत्तिष्ठति ॥ २७ ॥ मनोहवाऽअस्य सविता ॥२८॥ आदित्येन वरुणोदयनीयेन प्रचरति ॥ २९ ॥ प्रजापतिर्व्वाऽएषयदर्थ्शुः

॥ ३० ॥ देवाश्च वाऽअसुराश्च ॥ ३१ ॥ अथ स्रुवञ्चाज्यविलापनीं चादाय ॥ ३२ ॥ अरण्योरग्नी समारोह्य ॥ ३३ ॥ केशवस्य पुरुषस्य ॥ ३४ ॥ आग्नेयोष्टाकपालः पुरोडाशो भवति ॥ ३५ ॥ असद्वाऽइदमग्रऽआसीत् ॥ ३६ ॥ प्रजापतिरग्निरूपाण्यभ्यध्यायत् ॥ ३७ ॥ द्वितीयम् ॥ एतद्वै देवाऽअब्रुवन् ॥ ३८ ॥ अथैनमतः खनत्येव ॥ ३९ ॥ पर्णकषाय निष्पका ऽएताऽआपो भवन्ति ॥ ४० ॥ भूयाᳩसि हवीᳩषि भवन्ति ॥ ४१ ॥ रुक्मम्प्रतिमुञ्चविभर्त्ति ॥ ४२ ॥ वनीवाह्येताग्निं विभ्रदित्याहुः ॥ ४३ ॥ गार्हपत्यं चेष्यन् पलाश शाखया व्युदूहति ॥ ४४ ॥ अथातो नैर्ऋति-र्हरंति ॥ ४५ ॥ चितोगार्हपत्यो भवति ॥ ४६ ॥ आत्मन्यग्निंगृहीतेचे-ष्यन् ॥ ४७ ॥ कूर्म्ममुपदधाति ॥ ४८ ॥ प्राणभृत उपदधाति ॥ ४९ ॥ द्वितीयाचितिमुपदधाति ॥ ५० ॥ तृतीयांचितिमुपदधाति ॥ ५१ ॥ चतुर्थी चितिमुपदधाति ॥ ५२ ॥ पंचमीं चितिमुपदधाति ॥ ५३ ॥ नाकसदऽ-उपदधाति ॥ ५४ ॥ ऋतव्याऽउपदधाति ॥ ५५ ॥ अथातः शतरुद्रिय-ञ्जुहोति ॥ ५६ ॥ उपवसथीयेहन्प्रातरुदितऽआदित्ये ॥ ५७ ॥ अथातो-वैश्वानरञ्जुहोति ॥ ५८ ॥ अथातो राष्ट्रभृतो जुहोति ॥ ५९ ॥ अथातः पयोव्रतताये ॥ ६० ॥ अग्निरेषपुरस्ताश्चीयते ॥ ६१ ॥ प्रजापतिःस्वर्गंलोक-मजिगाᳬसत् ॥ ६२ ॥ प्राणोगायत्री ॥ ६३ ॥ प्रजापतिंविस्रस्तम् ॥६४॥ तस्यवाऽएतस्याग्नेः ॥ ६५ ॥ अथहैतेरुणे ॥ ६६ ॥ सँवत्सरोवैयज्ञः प्रजा-पतिः ॥ ६७ ॥ त्रिर्हवैपुरुषोजायते ॥ ६८ ॥ वागघवाऽएतस्याग्निहोत्रस्या-ग्निहोत्री ॥ ६९ ॥ उद्दालकोहारुणिः ॥ ७० ॥ उर्वशीहाप्सराः ॥ ७१ ॥

भृगुर्हवैव्वारुणिः ॥ ७२ ॥ पशुबन्धेन यजते ॥७३॥ तद्यथाह वै ॥७४॥ अयं वै यज्ञो योऽयं पवते ॥ ७५ ॥ समुद्रँवव्वाऽएते प्रचरन्ति ॥ ७६ ॥ यद्वालोके ॥ ७७ ॥ दीर्घसत्रठं हवाऽएतऽउपयन्ति ॥ ७८ ॥ तदाहुर्यदेष-दीर्घसत्री ॥ ७९ ॥ सोमो वै राजा यज्ञः प्रजापतिः ॥ ८० ॥ विश्वरू-पँवै त्वाष्ट्रमिन्द्रोहन् ॥ ८१ ॥ इन्द्रस्य वै यत्र ॥ ८२ ॥ एतस्माद्वै यज्ञा-त्पुरुषो जायते ॥ ८३ ॥ ब्रह्मौदनं पचति ॥ ८४ ॥ प्रजापतिर्देवेभ्यो यज्ञान् व्यादिशत् ॥ ८५ ॥ प्रजापतेरक्ष्यश्वयत् ॥ ८६ ॥ उत्तमं प्रजापतिरकाम-यत ॥ ८७ ॥ अथप्रातर्गोतमस्य ॥ ८८ ॥ पुरुषोहनारायणोऽकामयत ॥ ॥ ८९ ॥ ब्रह्म वै स्वयंभुतपोतप्यत ॥ ९० ॥ अथास्मैश्मशानं कुर्वन्ति द्यौः शान्तिः ॥ ९१ ॥ देवाहवैसत्रनिषेदुः ॥ ९२ ॥ अथातो रौहिणौ जुहोति ॥ ९३ ॥ सवैतृतीयेहन् ॥ ९४ ॥ द्व्याह प्राजापत्याः ॥ ९५ ॥ दृस-वालाकिर्हानूचानोगार्ग्यऽआस ॥ ९६ ॥ जनकोहवै देहः ॥ ९७ ॥ जन-कठं हवैदेहँय्याज्ञवल्क्यो जगाम ॥ ९८ ॥ पूर्णमदः पूर्णमिदम् ॥ ९९ ॥ श्वतकेतुर्हवाऽआरुणेयः ॥१००॥ प्राश्नीपुत्रादासुरिवासिनः ॥ **इति चतु-र्दश काण्डेष्वध्यायोक्ता ऋषयस्तृप्यन्ताम् ।**

अथ प्रपाठकाः ।

व्रतमुपैष्यन् ॥ १ ॥ चतुर्द्धा विहितो हवाऽअग्नेग्निरास ॥ २ ॥ तेवाऽ आर्द्राः स्युः ॥ ३ ॥ सस्रुचोत्तरमाघार माघारयिष्यन् ॥ ४ ॥ यज्ञेनवैदे-वाः ॥ ५ ॥ यज्ञेन वै देवादिवमुपोदक्रामन् ॥ ६ ॥ सवैस्रुचौव्यूहति ॥७॥ सयद्वाऽइतश्चेतश्चसम्भरति ॥ ८ ॥ व्वरुणोहैन द्राज्यकामऽआदधे ॥ ९ ॥

यत्रवैप्रजापतिꣳ प्रजाः समृजे ॥ १० ॥ प्रजापतिर्हवाऽएतेनाग्ने यज्ञेनेजे ॥ ११ ॥ महाहविषाहवैदेवाव्वृत्रञ्जघ्नुꣳ ॥ १२ ॥ देवयजनञ्जोषयन्ते ॥ १३ ॥ वाचंय्यच्छति ॥ १४ ॥ नीडेक्कृष्णाजिनमास्तृणाति ॥ १५ ॥ तद्यऽएषपूर्वोध्यर्योव्वर्षिष्ठस्थूणाराजो भवति ॥ १६ ॥ व्विजामानोहैवास्य-धिष्ण्याꣳ ॥ १७ ॥ पाशंक्त्वाप्रतिमुञ्चति ॥ १८ ॥ सौत्युपसृजति ॥१९॥ प्राणो हवाऽअस्योपाꣳशुः ॥ २० ॥ आत्मा हवाऽअस्याग्रयणाꣳ ॥२१॥ घ्नन्ति वाऽएतद्यज्ञम् ॥ २२ ॥ स वाऽअवभृथमभ्यवैति ॥ २२ ॥ तद्यत्रै तदूद्वादशाहेन व्यूढच्छन्दसा यजते ॥ २४ ॥ देवाश्च वाऽअसुराश्च ॥२५॥ बार्हस्पत्येन चरुणा प्रचरति ॥ २६ ॥ सवाऽअपःसम्भरति ॥ २७ ॥ मैत्रा-वरुण्यापयस्य या प्रचरति ॥ २८ ॥ असद्वाऽइदमग्रऽआसीत् ॥ २९ ॥ प्रापत्यं चरकाआलम्भते ॥ ३० ॥ प्रदीप्ताऽएतेग्नयोभवन्ति ॥ ३१ ॥ तस्या एतस्याऽआषाढां पूर्वां करोति ॥ ३२ ॥ रुक्मंप्रतिमुञ्चबिभर्ति ॥ ३३ ॥ गार्हपत्यं चेष्यन् पलाशशाखया व्युदूहति ॥ ३४ ॥ अथदर्भस्तम्बमुपद-धाति ॥ ३५ ॥ आत्मन्नग्निंगृह्णीतेचेष्यन् ॥ ३६ ॥ कूर्ममुपधाति ॥ ३७ ॥ प्राणभृत उपदधाति ॥ ३८ ॥ अथ व्विश्वज्ज्योतिषमुपदधाति ॥ ३९ ॥ अथातोऽन्वावृतम् ॥ ४० ॥ गार्हपत्यमुपदधाति ॥ ४१ ॥ अथातः शतरुद्रि यञ्जुहोति ॥ ४२ ॥ प्रत्येत्याग्निम्प्रहरिष्यन् ॥४३॥ अथैतान् यज्ञक्रतूञ्जु-होति ॥ ४४ ॥ अथ प्रातः प्रातरनुवाकमुपाकरिष्यन् ॥ ४५ ॥ अग्निरेष-पुरस्ताद्धीयते ॥ ४६ ॥ अथातश्चयनस्यैव ॥ ४७ ॥ सँवत्सरो वै प्रजापति रग्निः ॥ ४८ ॥ नेववाऽइदमग्रेसदासीन्नेवसदासीत् ॥ ४९ ॥ सँव्वत्स-

रो वैयज्ञः प्रजापतिः ॥ ५० ॥ अपिहवाऽएतर्हि ॥ ५१ ॥ प्रजापतिर्वै प्रजाः सृजमानोऽतप्यत ॥ ५२ ॥ अथातः स्वाध्यायप्रशꣳसा ॥ ५३ ॥ अयँव्वैयज्ञोयोयंपवते ॥ ५४ ॥ पुरुषꣳ हनारायणं प्रजापतिरुवाच ॥५५॥ सोमोवैराजायज्ञꣳ प्रजापतिः ॥ ५६ ॥ प्रजापतिर्यज्ञमसृजत ॥ ५७ ॥ ब्रह्मौदनंपचति ॥ ५८ ॥ नियुक्तेषुपशुषु ॥ ५९ ॥ प्रमुच्याश्वं दक्षिणेन व्वेदिम् ॥ ६० ॥ पुरुषो ह नारायणोऽकामयत ॥ ६१ ॥ देवा ह वै सत्रन्निषेदुꣳ ॥ ६२ ॥ सयत्रैताꣳहोतान्वाह ॥ ६३ ॥ द्व्याह प्राजापत्याꣳ ॥ ६४ ॥ दृप्तबालाकिर्हानूचानोगार्ग्यऽआस ॥ ६५ ॥ अथ हैनंभुज्युर्ल्लाह्यायनिꣳपप्रच्छ ॥ ६६ ॥ जनकꣳ हवैदेहँय्याज्ञवल्क्यो जगाम ॥ ६७ ॥ भूमिरन्तरिक्षन्द्यौरिति ॥ ६८ ॥ प्राश्नीपुत्रादासुरीवासिनः ॥ ६९ ॥"

इति चतुर्दशकाण्डे प्रपाठोक्ताऋषयस्तृप्यन्ताम् ।

अथ शतस्थानानि ।

"व्रतमुपैष्यन् ॥ १ ॥ तद्यदेवंपिनष्टि ॥ २ ॥ अथाज्यलिप्ताभ्यां पवित्राभ्याम् ॥ ३ ॥ बृहच्छो चायविष्ट्येति ॥ ४ ॥ व्वसूनाꣳरात्रौ स्याम ॥ ५ ॥ अग्निर्वैदेवानामद्धातमाम् ॥ ६ ॥ तद्यथायोनौरेतःसिञ्चेत् ॥ ७ ॥ तांव्वैप्राश्नन्त्येव ॥ ८ ॥ अथव्वेदपत्नीव्विस्रꣳसयति ॥ ९ ॥ अयं व्वै यज्ञो योऽयं पवते ॥ १० ॥ अथयदस्तमेति ॥ ११ ॥ रेवतीरमध्वमिति ॥ १२ ॥ सवाऽआग्नेयोष्टाकपालः पुरोडाशोभवति ॥ १३ ॥ तद्येसोमेनेजानाꣳ ॥ १४ ॥ अथोत्तरेण शालांपरिश्रयन्ति ॥ १५ ॥ अथोल्लिखति ॥१६॥ साखावभ्रुः पिङ्गाक्षीसासोमक्रयणीस्यात्॥१७॥प्रथमन्तेदेवाꣳ॥१८॥

इन्द्रघोषः प्रोक्षणीरध्वर्य्युरादत्ते ॥ १९ ॥ साहाकद्रूरुवाच ॥ २० ॥ तद्यऽएतउच्छ्रितादेवाहवैयज्ञन्तन्वानाः ॥ २१ ॥ अथपार्श्वेनवासिनावाप्रयौति ॥ २२ ॥ सजुहोतिश्रृणोत्वग्निः समिधाहवंमऽइति ॥ २३ ॥ इयर्ठं हवाऽउपाᳫंशुः ॥ २४ ॥ तस्यासावेवध्रुवऽआयुᳫं ॥ २५ ॥ यत्रद्यावापृथिव्यर्ठं शस्यते ॥ २६ ॥ सऽआज्यस्योपस्तीर्य्याद्भिश्चरोरवद्यति ॥ २७ ॥ इन्द्रोहवैषोडर्शा ॥ २८ ॥ तासां द्वादशगर्भाᳫं ॥ २९ ॥ द्वितीयातद्येहस्मपुराव्वाजपेयेन यजन्ते ॥ ३० ॥ अथ दिशोऽनुवीक्ष्यमाणो जपति ॥३१॥ स वै दीक्षते ॥ ३२ ॥ अथैतमभिषेकं कृष्ण विषाणयानुविसृष्टे ॥ ३३ ॥ षडेवोत्तरेचरवᳫं ॥ ३४ ॥ अथोऽआहुः प्रजापतिरेवविस्रस्तᳫं ॥ ३५ ॥ अमावास्यायां दीक्षते ॥ ३६ ॥ अश्वस्य पदे जुहोति ॥ ३७ ॥ अथैनां धूपयति ॥ ३८ ॥ तमुपरिनाभि बिभर्ति ॥ ३९ ॥ अथोखान्निवपति ॥ ४० ॥ द्वितीयाचतस्रः सीतायजुषा कृषति ॥ ४१ ॥ तं प्रत्यंचयन्तम् ॥ ४२ ॥ अपाङ्गभर्त्सीदेति ॥ ४३ ॥ तस्यमनोव्वैश्वकर्मणमिति ॥ ४४ ॥ तद्यैषामध्यमास्व यमातृण्णा ॥ ४५ ॥ एकादशभिरस्तुवतेति ॥ ४६ ॥ तावाऽएताः विराडेषा ॥ ४७ ॥ अथ स्वयमातृण्णामुपदधाति ॥ ४८ ॥ अथोत्तरार्द्धेन प्राक् ॥ ४९ ॥ सयः सव्वैश्वानरऽइमेसलोकाᳫं ॥ ५० ॥ यास्तेऽअग्नेसूर्येरुचᳫं ॥ ५१ ॥ नामकृत्वाथैनमुपतिष्ठते ॥ ५२ ॥ यावाऽइयंवेदिᳫं सप्तविधस्य ॥ ५३ ॥ अयमेवाकाशोजूर्योयमन्तरात्मन्नाकाशᳫं ॥ ५४ ॥ सोऽयमात्मात्रेधाविहित एव ॥ ५५ ॥ अथवर्ठंशᳫं ॥ ५६ ॥ अथयामेतामाहुतिं जुहोति ॥ ५७ ॥ अथ यदनुवाक्यामनूच्य ॥ ५८॥

ब्रह्मचार्यसीत्याह ॥ ५९ ॥ स यत्पशुबन्धेन यजतेऽग्नीनेवैतत्पुनर्नवाकुरुते ॥ ६० ॥ दशेति होवाच ॥ ६१ ॥ अथ यत्रस्कन्नꣳ स्यात् ॥ ६२ ॥ अथ यदि प्रप्लुतꣳ ॥ ६३ ॥ सर्वेऽअश्विना भवन्ति ॥ ६४ ॥ प्रजापति र्यज्ञमसृजत ॥ ६५ ॥ किंवा वपनं महदिति ॥ ६६ ॥ अथ योऽस्य निष्कः प्रतिमुक्तो भवति ॥ ६७ ॥ एतेनहेन्द्रो तो दैवाप ÷ शौनकꣳ ॥ ६८ ॥ चतस्रः सीतायजुषा कृषति ॥ ६९ ॥ अथोत्तरतꣳ सिकताऽउपकीर्णा भवन्ति ॥ ७० ॥ अथ रौहिणौ जुहोति ॥ ७१ ॥ ते देवाऽअब्रुवन् तावद्वाऽइदꣳ सर्वं यदन्नम् ॥ ७२ ॥ तानि यदा गृह्णाति ॥ ७३ ॥ योऽग्नौतिष्ठन् ॥ ७४ ॥ कतमऽआत्मेति ॥ ७५ ॥ अथ हैनं मनुष्या ऊचु ÷ ॥७६॥ अथ यामिच्छेद्गर्भन्दधीलेति ॥ ७७ ॥ सप्तसहस्रषट्शतशेषं चतुर्विंꣳ शतिः ॥ ७८ ॥ **प्राश्नीपुत्रादासुरीवासिनः ॥ ७९ ॥ इति चतुर्दश-काण्डे शतोक्ता ऋषयस्तृप्यन्ताम् ।**

अथ व्रतविसर्जनम् ।

अथ व्रतं विसृजते ॥ १ ॥ स यस्मिन्हर्त्तावमुँल्लोकमेति ॥ २ ॥ अथ निग्राभ्याभ्यो ग्रहान् विगृह्णते ॥ ३ ॥ अथ गृहपतिꣳ सुब्रह्मण्यामा-ह्वयति ॥ ४ ॥ ता वाऽएताꣳ ॥ ५ ॥ तानि दशभवन्ति ॥ ६ ॥ ताऽएता ऽअंगुलयꣳ ॥ ७ ॥ मध्यमेव तृतीया चितिꣳ ॥ ८ ॥ सहोवाच ॥ ९ ॥ अथ वर्ꣳशꣳ ॥ १० ॥ तस्माऽउहैतदुवाच ॥ ११ ॥ स वाऽएषऽआत्मैव यत्सौत्रामणी ॥ १२ ॥ मर्य्यादायाऽएव लोष्टमाहृत्य ॥ १३ ॥ प्राश्नी-पुत्रादासुरिवासिनꣳ ॥ १४ ॥ **अन्त्यकण्डिकोक्ता ऋषयस्तृप्य-ताम् ।**

एवं व्रतं विसृजेत् ॥ १ ॥ परमाङ्गतिङ्गच्छतीति ॥ २ ॥ तस्मा-द्धोतृचमसात् ॥ ३ ॥ तस्मिन्त्समुपहवमिष्ट्वा समिधोऽभ्यादधति ॥ ४ ॥ द्वादश वा त्रयोदश वा दक्षिणा भवन्ति ॥ ५ ॥ यावानग्निर्य्यावत्यस्य मात्रा तावत्तद्भवति ॥ ६ ॥ तस्मात्समानसम्बन्धनाः ॥ ७ ॥ तस्मादिमे प्राणाऽउपरिष्टादसञ्छन्नाः ॥ ८ ॥ संव्वादेनैवर्त्त्विजो लोकाऽइति ॥ ९ ॥ ब्रह्मणो ब्रह्म स्वयम्भु ब्रह्मणे नमः ॥ १० ॥ कैशिनीरेवेमाऽअप्येतर्हि प्रजा जायन्ते ॥ ११ ॥ तस्मादिमावात्मानमभितोबाहू ॥ १२ ॥ तस्मादु हैतज्जीवाश्च पितरश्च न सन्दृश्यन्ते ॥ १३ ॥ व्वाजसनेयेन याज्ञवल्क्येना-ख्यायन्ते ॥ १४ ॥ इति चतुर्दशकाण्डे अन्त्यपंक्तिकोक्ता ऋषयस्तृप्यन्ताम् ।

"ॐ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ १ ॥ इषेत्वोर्जेत्वा वायवस्थ देवोवः सविता प्रार्पयतु श्रेष्ठतमायकर्मणा आप्यायध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मा मावस्तेनऽईशतमा घशंठ सोध्रुवाऽअस्मिन्गोपतौ स्यातबह्वीर्यजमानस्य पशून्पाहि ॥ २ ॥ अग्नऽआ याहिवीतयेगृणानोहव्यदातये । निहोतासत्सिबर्हिषि ॥३॥ शन्नो देवीरभिष्टयऽआपोभवन्तु पीतये । शंय्योरभिस्रवन्तुनः ॥४॥ इति चतुर्वे-दोक्ता ऋषयस्तृप्यन्ताम् ॥

ततः शिरसा नमन् साञ्जलिः—"ॐ तदेतदृचाभ्युक्तं न मृषा श्रान्तं यदवन्ति देवाऽइति नहैवैवं विदुषः किञ्चनमृषा श्रान्तं भवति तथो ह्यस्यैतत्सर्वेदेवाऽअवन्ति" ॥ १ ॥ इति पठित्वा नमस्कारं कुर्यात् ।

अथ ऋषिश्राद्धम् ।

तत्रादौ आचम्य प्राणनायम्य देशकालौ सङ्कीर्त्य-अमुकगोत्रः अमुकशर्म्मा (वर्मा, गुप्तो)ऽहं "उत्सर्गाङ्गभूतमृषिश्राद्धमहं करिष्ये"। इति सङ्कल्प्य सर्षपाक्षतेन दिग्बन्धं कुर्यात् ।

ततः सर्षपाक्षतं स्ववामहस्ते गृहीत्वा-"ॐ इदम्विष्णुर्विचं-क्रमे त्रेधा निदधे पदम् । समूढमस्य पाᳬसुरे स्वाहा"॥ इति मन्त्रेण चतुर्दिक्षु सर्षपाक्षतान्दक्षिणहस्तेन विकीरयेत् ।

ततो ब्राह्मणेभ्यो देयानि वस्तूनि कुशत्रयाऽऽनीत जले-नाभिषिञ्चन् "ऋषिश्राद्धस्योपहाराः शुचयो भवन्तु" इति पठेत् ।

ततोऽक्षतादिना देयवस्तूनि निर्दिशन्-"देशकाल पात्र-सम्पदस्तु ॐ अरुन्धतीसहितकश्यपादि ऋषीणामिदमासनं यथा यथाविभागं वः स्वाहा नमः । अरुन्धतीसहित कश्यपादय ऋषयः यथादत्तं गन्धाद्य-र्चनं यथा यथाविभागं वः स्वाहा नमः"। इति पठेत् । इति गन्धा-दिदानम् ।

ततो यथाशक्ति ब्राह्मणानां भोज्यादिदानेन तृप्तिकर्त-व्यतामुद्दिश्य-"ऋषिश्राद्धसाङ्गतासिद्ध्यर्थं सप्त संख्याकान् (यथा-संख्याकान्वा) ब्राह्मणान् यथाकालेन यथा सम्पन्नान्नेन तर्पयिष्ये"। तेभ्यो दक्षिणां च दास्ये" तेन अरुन्धतीसहित कश्यपादय सप्तर्षयः प्रीयन्ताम् । इति पठेत् ।

अथाऽऽचार्यादिभ्योदक्षिणादानम् ।

ततो दक्षिणहस्ते जलाक्षत द्रव्यञ्चादाय-"ऋषिश्राद्ध साङ्गतासिद्ध्यर्थं हिरण्यनिष्क्रयीभूतां दक्षिणामाचार्याय तुभ्यमहं सम्प्रददे"। इति दद्यात् ।

तत आचार्यः कोदादिति पठेत्–" ॐ कोदात्कस्माऽअदात्का- मोदात्कामायादात् । कामो दाता कामं ÷ प्रतिगृहीता कामै तत्ते " ॥१॥

तत उपविष्टेषु ब्राह्मणानां हस्तेषूदकादिदानम् ।

तद्यथा–" ॐ शिवा आपः सन्तु " । (**सर्वत्र सन्त्विति** विप्राः प्रतिवचनं दद्युः । " ॐ सौमनस्यमस्तु " "ॐ अक्षतं चारिष्टं चास्तु" । " ॐ अघोरा ऋषय सन्तु " । **इति सप्तर्षिषु जलधारां दद्यात् ।**

तत उत्सर्गकर्मणो न्यूनातिरिक्तदोषपरिहारार्थं नानानाम- गोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां विभज्य सम्प्रददे " । **इति दक्षिणां दद्यात् ।**

ततो यजमानः–" उत्सर्गाङ्गभूतमृषिश्राद्धं परिपूर्णमस्तु " । **इति प्रार्थयेत् ।**

ब्राह्मणाश्च–" ॐ अस्तु परिपूर्णम् " **इति पठेयुः ।**

ततः–" ॐ सहनोऽस्तु सहनोऽवतु सहनऽइन्द्रं वीर्यवदस्तुब्रह्मइन्द्रस्त- द्वेदयेन यथा न विद्विषामह इति " । ॐ उभाकवीषु वा यो नो धर्मः परा पतत् परिसख्यस्य धर्मिणो व्विसख्यानि विसृजामह"। **इति सर्वे जपेयुः ।** " ॐ विरतास्म " । **इति प्रब्रूयुः । इति ऋषि श्राद्धम् ।**

अथ कर्पूरार्तिक्यम् ।

" ॐ कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् । सदावसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि " ॥

" ॐ जय लक्ष्मी रमणा श्रीलक्ष्मीरमणा । सत्यनारायण स्वामी जन- पातक हरणा ॥ **जयलक्ष्मी०** ॥ १ ॥ **टेर** ॥

रत्नजड़ित सिंहासन अद्भुत छवि राजै । नारद करत निराजन घण्टा- ध्वनि बाजै ॥ **जय लक्ष्मी०** ॥२॥ प्रकट भये कलिकारण द्विजको दरश दिया । बूढो ब्राह्मण बनके कञ्चनमहल किया ॥ **जय लक्ष्मी०** ॥ ३ ॥

दुर्बल भील कठारो जिनपर कृपा करी । चन्द्रचूड़ एक राजा जिनकी विपति हरी ॥ **जय लक्ष्मी०** ॥ ४ ॥ वैश्य मनोरथ पायो श्रद्धा तज दीनी । सो फल भोग्यो प्रभुजी फिर स्तुति कीनी ॥ **जय लक्ष्मी०** ॥५॥ भाव भक्तिके कारण छिन छिन रूप धरया। श्रद्धा धारण कीनी जिनका काज सरया ॥ **जय लक्ष्मी०** ॥ ६ ॥ ग्वालवाल सङ्ग राना वनमें भक्ति करी । मन वाञ्छित फल दीन्यो दीनदयाल हरी ॥ **जय लक्ष्मी०** ॥ ७ ॥ चढ़त प्रसाद सवायो कदली फलमेवा । धूप दीप तुलसीसे राजी सत्यदेवा । **जय लक्ष्मी०** ॥ ८ ॥ श्रीसत्यनारायणजीकी आरति जो कोई नर गावे । भणत शिवानन्दस्वामी सुख सम्पति मन वाञ्छित फल पावे" ॥ **जय लक्ष्मी०** ॥ ९ ॥

अथ पुष्पाञ्जलि मन्त्राः ।

तत्रादौ हस्ते पुष्पाक्षतानादाय–"ॐ यज्ञेन यज्ञमयजन्त देवस्तानि धर्म्माणि प्रथमान्यासन् । तेह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥

ॐ राजाधिराजाय प्रसह्यसाहिने । नमो वयं वैश्रवणाय कुर्महे ॥ स मे कामान् कामकामाय मह्यम् कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय महाराजाधिराजाय नमः ॥ " २ ॥

" ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात्सार्वभौमः सर्वायुष आन्तादापरार्धात पृथिव्यै समुद्रपर्यन्ताया एकराडिति । तदप्येषश्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे ॥ आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासदः" ॥ ३ ॥

"ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नोरुद्रः प्रचोदयात्" ॥४॥

" ॐ विश्वतश्चक्षूरुत विश्वतोमुखो विश्वतो बाहुरुत व्विश्वतस्पात् । सम्बाहुभ्यान्धमति सम्पतत्रैर्द्यावाभूमी जनयन्देवएकः " ॥ ५ ॥

" ॐ मानस्तोकेतनये मानऽआयुषिमानो गोषु मानोऽअश्वेषुरीरिषः । मानो व्वीरान्रुद्रभामिनो व्वधीर्हविष्मन्तः सदमित्त्वा हवामहे " ॥ ६ ॥

" ॐ सेवन्तिका वकुल चम्पक पाटलाब्जैः पुन्नाग जातिकरवीर रसाल पुष्पैः । विल्व प्रवाल तुलसीदल मञ्जरीभिस्त्वां पूजयामि जगदीश्वर मे प्रसीद ॥७॥ **इति मन्त्र पुष्पाञ्जलिं समर्प्य प्रदक्षिणां कुर्यात् ।**

" ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः । तेषा ᳪ सहस्र-योजनेऽवधन्वानि तन्मसि ॥ १ ॥ यानि कानि च पापानि जन्मान्तर कृतानि च । तानि तानि प्रणश्यन्ति प्रदक्षिण पदे पदे " ॥ २ ॥ **इति प्रदक्षिणी कृत्य साष्टाङ्गं प्रणम्य विसर्जनं कुर्यात् ।**

अथ देवता विसर्जनम् ।

" ॐ उत्तिष्ठ ब्रह्मणस्पतेदेवयन्तस्त्वेमहे । उपप्रयन्तु मरुतः सुदानवऽ इन्द्रप्राशूर्भवाशचा " ॥ १ ॥

ततो हस्ते पुष्पाक्षतानादाय विसृजन्मन्त्रं पठेत्—" ॐ समुद्रंगच्छस्वाहान्तरिक्षङ्गच्छस्वाहादेवठं सवितारङ्गच्छ स्वाहा मित्रावरुणौ-गच्छ स्वाहा होरात्रेगच्छ स्वाहा च्छन्दाᳪसि गच्छ स्वाहा द्यावा पृथिवी-गच्छस्वाहायज्ञङ्गच्छस्वाहा सोमङ्गच्छस्वाहा दिव्यन्नभोगच्छ स्वाहाग्निं व्वैश्वानरङ्गच्छ स्वाहामनो मे हार्दियच्छदिवन्तेधूमोगच्छतु स्वज्योतिः पृथिवीम्भस्मनापृण स्वाहा " ॥ १ ॥ **इति स्वस्व प्रवरान् । विसर्जयित्वा जले प्रवाहयेत् ।**

ततो द्विराचमनं कुर्युः।

पुनरक्षतानादाय–"ॐ यान्तु देवगणाः सर्वे पूजामादाय मामिकाम्। इष्टकाम प्रसिद्ध्यर्थं पुनरागमनाय च" ॥ १ ॥ **इति देवान् विसर्जयेत्।**

ततो हस्तेजलमादाय–"अनेनाध्यायोत्सर्गकर्माङ्गत्वेन कृतेन ऋषिपूजन तर्पणादि कर्मणा श्रीभगवान्वेदपुरुषः प्रीयतां न मम। ॐतत्सद्ब्रह्मार्पणमस्तु।

ततः–"प्रमादात्कुर्वतां कर्म प्रच्यवेताऽध्वरेषु यत्। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञ क्रियादिषु। न्यूनं संम्पूर्णतां याति सद्यो वन्दे तमच्युतम्"॥ **इति प्रणम्य कर्म पूर्तिकामो विष्णुं स्मरेत्। ॐ विष्णवे नमः ३।**

इति उपाकर्म प्रयोगः समाप्तः।

ततः रक्षाबन्धनमस्यामेव पूर्णिमायां भद्रारहितायां कार्यम्।

---

१ अयं रक्षाबन्धो भद्रायां न कार्यः।

तदुक्तं स्मृति सङ्ग्रहे–"भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा। श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी"॥ इति वचनात्।

अत्र श्रावणीति शब्देन श्रावण्यां क्रियमाणं रक्षाबन्धनमेव गृह्यते नोपाकर्म तस्य पृथगुपादानात्।

यथा निगमे–"श्रावण्यां श्रावणीकर्म यथाविधि समाचरेत्। उपाकर्म तु कर्तव्यं कर्कटस्थे दिवाकरे"॥

उपाकर्म तु सति सम्भवे भन्द्रान्त एव कार्यम्। असम्भवे तु भद्रायामपि दिने एव कार्यन्न तु रात्रौ। रक्षा बन्धनन्तु सति सम्भवे भद्रान्ते कुर्यात्। दिवा भद्रायां सत्यां तदन्ते रात्रौ वा कुर्यात्। न तथोपाकर्म तस्य पूर्वाह्ण एव विधानात्।

तदुक्तं भविष्योत्तर पुराणे–"उपाकर्मदिने प्रोक्तमृषीणां चैव तर्पणम्"। इति।

तत्रादौ अपराह्णे सर्षपाक्षतहेमसहितां विचित्रक्षौमवस्त्रैर्वा कार्पासतन्तुभि ग्रंथितां शुभां रक्षा पोटलिकां विधाय शुद्धभाजने संस्थाप्य कुङ्कुमाक्षतैर-भ्यर्च्य ब्राह्मणान्सम्पूज्य दक्षिणाभिः सन्तोष्य पूर्वाभिमुखो ब्राह्मणद्वारा रक्षा-बन्धनं कारयेत् ।

तत्रमन्त्रः-"येन बद्धो बली राजा दानवेन्द्रो महाबलः । तेन त्वाम-भिबध्नामि रक्षे ! मा चल मा चल ॥ ब्रह्मा विष्णुश्च रुद्रश्च रक्षां कुर्वन्तु ते सदा" ॥ १ ॥ इति रक्षांबध्नीयात् ।

'श्रीराजस्थान राज्यान्तर्गत श्रीरतनगढनिवासिना गौडवंशावतंसेन-वशिष्ठगोत्रोद्भवेन, शींवालोपाह्वेन, पण्डित श्रीकस्तूरीचन्द्र पौत्रेण, श्रीचतु, र्थीलालात्मजेन, श्रीगङ्गाधर शर्मणा तामड़ायतेन सङ्गृहीता विपुलटिप्पण्यादि सहिता "चातुर्थीलाली उपाकर्मपद्धतिः" समाप्ता"।

---

१ अत्र रक्षाबन्धनमुक्तं हेमाद्रौ-"ततोऽपराह्णसमये रक्षापोटलिकां शुभाम् । कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषितैः" ॥

२ "अनेन विधिना यस्तु रक्षाबन्धं समाचरेत् । स सर्वं दोषरहितः सुखी सम्वत्सरं भवेत्" ॥

संस्कार गणपतौ-"ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च मानवैः । कर्तव्यो रक्षिकाबन्धो द्विजान्सम्पूज्य शक्तितः" ॥

अथ उपाकर्म सामग्री–

दूर्वा	तिल ऽ॥
दर्भा (डाभ)	यव ऽ॥
यज्ञीय भस्म	चावल ऽ१
गोदुग्ध ऽ१ गोदधि ऽ॥	अपामार्ग (ऊंगो) ।
गोघृत ऽ=	मृत्तिका
गोमूत्र	सफेदवस्त्र हाथ १
गोमय (गोबर)	हाण्डी २
	पीसा – रेजकी ।

अथ ऋषिपूजनोपयोगी सामग्री–

रोली	केशर	दूर्वा
मोली (नाल)	चन्दन	दर्भा
पान ५	कपूर	तुलसीपत्र
सुपारी ऽ–	रूई	बड़-पीपलकापत्ता
गुड़ ऽ।	दिवासलाई (पेटी) १	बिल्वपत्र
चावल ऽ२	पुष्प	अपामार्ग
लाडू ऽ१	यव ऽ।	पातलजाली १
पेड़ा ऽ॥	हलदी (पिसीहुई)	सराई ११
लूंग	धोती १	पंचपात्र २
इलायची	गोच्छो १	चमची २
ऋतुफल	दुपट्टो १	अर्घी १

पंचमेवो ऽ।	तील १	तामड़ी १
गोदुग्ध ऽ१	शालग्रामजीकी मूर्ति-	आसन
गोदधि ऽ॥	सिंहासन सहित	शुद्धजल
गोघृत ऽ।	सफेद वस्त्र	गेहूं ऽ१
मधु (शहद)	लाल वस्त्र	पीला
चींनी	पाट्टवस्त्र	रेजकी
गंगाजल	ताम्रकलश १	रोकड़ी
जनेऊजोड़ा ११	चौकी बढी	
नारियल २	पाटियो १	
पीली सरसों ऽ–	कर्मपात्र (लोटो १)	
सिन्दूर ७	देवपूजा पात्र	
अबीर गुलाल ७	शंख १	
धूपबत्तीपूड़ो १	टाली १	
तिल ऽ।	आरती १	

ग्रन्थकारस्य सप्तपुरुषात्मकः कल्पतरुरयम् ॥

महादेव[1] – गंगाधर[2]

चतुर्थीलाल – गुलसुखराय

चतुर्भुजदास[1] – कस्तूरीचन्द्र[2] – जेठमल[3]

रामकृष्ण[1] – अमरचन्द्र[2] – गुमानीराम[3]

चैनीराम[4] – लालचन्द[5]

जीवराज[1] रामनारायण[2]

रामदत्त

नाथुराम

श्रीशुक्लयजुर्वेद – माध्यन्दिनीय शाखा –

वाशिष्ठ शाक्त्य पाराशरास्त्रिप्रवराः ।

(केषाञ्चिन्मते – वशिष्ठात्रि साङ्कृतयस्त्रिप्रवराः)

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान :

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५,
फैक्स -०२०-२६८७४९०७.

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१
दूरभाष/फैक्स- ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-२४२००७८

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बँक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५.

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१
दूरभाष - ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१
दूरभाष - ०५४२-२४२००७८.

KHEMRAJ SHRIKRISHNADASS